रसप्रश्नाः

१. अमरकोषस्य कर्त्रा स्वग्रन्थस्य नाम किम् इति निर्दिष्टम् ?

(१. अमरकोषः २. नामलिङ्गानुशासनम् ३. नामार्थकोषः)

२. पाणिनिना विरचितस्य काव्यस्य नाम किम् ?

(१. जाम्बवतीविजयम् २. जाम्बवतीपरिणयः ३. जाम्बवतीयम्)

३. बृहत्कथा कया भाषया लिखिता ?

(१. संस्कृतेन २. पालिभाषया ३. पैशाचिकभाषया)

४. भीष्मस्य जन्मनाम किम् ?

(१. देवव्रतः २. देवप्रियः ३. प्रियव्रतः)

५. संस्कृतस्य कः ग्रन्थः अत्यधिकभाषासु अनूदिता अस्ति ?

(१. भगवद्गीता २. पञ्चतन्त्रम् ३. रामायणम्)

६. कः सुप्रसिद्धः गद्यग्रन्थः कथानायक्याः नाम्ना आह्वयते ?

(१. कादम्बरी २. वासवदत्ता ३. हर्षचरितम्)

७. रामायणे कति श्लोकाः सन्ति ?

(१. लक्षश्लोकाः २. दशसहस्रश्लोकाः ३. चतुर्विंशतिसहस्रश्लोकाः)

८. 'मृच्छकटिक'-ग्रन्थस्य कर्ता कः ?

(१. शूद्रकः २. विशाखदत्तः ३. राजशेखरः)

९. हितोपदेशः केन रचितः ?

(१. नारायणभट्टेन २. विष्णुशर्मणा ३. भट्टनारायणेन)

१०. अद्वितीय-संस्कृत-दिनपत्रिकायाः नाम किम् ?

(१. शारदा २. भारती ३. सुधर्मा)

३ (०४) २ (१) १ (२)

३(७) १ (३) २ (५) १ (४) ३ (६) १ (८) २ (९) - उत्तराणि

* * *

रसप्रश्नाः –

गणे अनर्हः शब्दः कः ?

[अधोलिखितेषु प्रश्नेषु एकैकस्मिन् अपि त्रयाणां गणः कश्चन अस्ति । तन्मध्ये गणे प्रवेष्टुम् अनर्हः चतुर्थः शब्दः प्रविष्टः । प्रतिप्रश्नं तादृशः शब्दः कः इति विचार्य पृथक्कुर्वन्तु]

१. ब्रह्मा इन्द्रः महेश्वरः विष्णुः ।

२. गार्गी लोपामुद्रा द्रौपदी अरुन्धती ।

३. पुस्तकं दर्वी स्थालिका चषकः ।

४. भास्कराचार्यः वराहमिहिरः आर्यभटः चरकः ।

५. पाणिनिः व्यासः पतञ्जलिः वररुचिः ।

६. वासवदत्ता कादम्बरी हर्षचरितं नैषधीयचरितम् ।

७. अभिज्ञानशाकुन्तलम् विक्रमोर्वशीयम् मालविकाग्निमित्रम् मालतीमाधवम् ।

८. शाकटायनः शाकल्यः वाल्मीकिः भागुरिः ।

९. भवति एधते कुप्यति वन्दते ।

१०. धनुः गुरुः भानुः विष्णुः ।

११. वृक्षाः चन्द्रमाः लताः नद्यः ।

१२. मेदिनी हलायुधः शब्दार्थकल्पद्रुमः भृगुसंहिता ।

१३. इतः ततः मातः कुतः ।

उत्तराणि—

१. ब्रह्मा: त्रिमूर्तिषु न प्रविष्टः । २. ब्रौपदी न ऋषिपत्नी । ३. पुस्तकं भोजनोपयोगी पदार्थः न । ४. चरकः गणितज्ञः त्रिष्टः । ५. व्यासः न वैयाकरणेषु प्रविष्टः । ६. नैषधीयचरितं न गद्यम् । ७. मालतीमाधवं न कालिदासस्य । ८. वाल्मीकिः पाणिनिपूर्वकालीन-वैयाकरणेषु त्रिष्टः । ९. कुप्यति इति धातूनां प्रथमगणे न प्रविष्टम् । १०. धनुः– न उकारान्तः शब्दः । ११. 'वृक्षाः' इति बहुवचनान्तं रूपं न । १२. मेदिनी न शब्दकोषः । १३. 'मातः' इत्येतत् अव्ययपदं न ।

रसप्रश्नाः

कः शुद्धः शब्दः ?

(अधस्तनवाक्येषु रिक्तस्थाने एकः शब्दः सविभक्तिकः पूरणीयः अस्ति । तदर्थं वाक्यस्य अधः शब्दाः दत्ताः सन्ति । तेषु शुद्धं शब्दरूपम् अन्विष्य वाक्ये पूरयन्तु)

१. जनैः क्षीरेण देवस्य.....(holy sprinkling) क्रियते ।
(अभिशेकः, अविषेकः, अभिषेकः, अभिषेखः)

२. तण्डुलैः.....(Beaten rice) निर्मान्ति ।
(पृथुकान्, प्रथुकान्, पृथुखान्, पृतुकान्)

३. समितौ दश.....(Trustees) सन्ति ।
विश्वस्थाः, विश्वस्ताः, विस्वस्ताः, विष्वस्थाः

४. अहम्.....(Teacher Fem) अस्मि ।
(अद्यापकी, अध्यापिका, अद्यापिका, अध्यापकी)

५. रामः अयोध्यायां.....(Birth) प्राप्तवान् ।
(जन्मः, जन्मं, जनुमं, जन्म)

६. 'सुन्दरं पुष्पम्' इत्यत्र सुन्दरपदं.....(Adjective)
(विशेषणं, विषेषणं, विषेशणं, विशेशणं)

७. सर्वैः.....(According to one's ability) समाजसेवा करणीया ।
(यथाशक्तिः, यथाशक्ति, यथाशक्ति, यथाशक्ती)

८. यः शास्त्रं जानाति सः.....(Scholar)
(शास्त्रिः, शास्त्रिन्, शास्त्री, शास्त्री)

९. .....(In Assembally) आयव्ययचर्चा भविष्यति ।
(अधिवेशने, अधिवेषने, अदिवेशने, अदिवेषने)

१०. यदि विषयं जानाति तर्हि उत्तरकथने किं ..... ? (Difficulty)
(काठिण्यं, काटिन्यं, काटिण्यं, काठिन्यं)

४ (०१ १ (१ ४ (२ ६ (३

१ (३ ४ (५ २ (४ २ (६ १ (२ ६ (१ —ध्यायद

रसप्रश्नाः

युक्तं युक्तेन योजयन्तु

['अ'पट्टिकायां केचन शब्दाः सन्ति । तत्सम्बन्धिशब्दाः 'ब'पट्टिकायाम् इतस्ततः सन्ति । परस्परं युक्तेन युक्तं योजयन्तु ।

	अ	ब
I	१. ऋतुसंहारः	१. जयदेवः
	२. गीतगोविन्दम्	२. श्रीहर्षः
	३. नीतिशतकम्	३. कालिदासः
	४. गङ्गालहरी	४. भर्तृहरिः
	५. रत्नावली	५. जगन्नाथः
II	१. पाणिनिः	१. मीमांसाशास्त्रम्
	२. आनन्दवर्धनः	२. आयुर्वेदः
	३. वाग्भटः	३. तर्कशास्त्रम्
	४. जैमिनिः	४. अलङ्कारशास्त्रम्
	५. गदाधरः	५. व्याकरणशास्त्रम्
III	१. चम्पूरामायणम्	१. अनन्तभट्टः
	२. नलचम्पूः	२. वेङ्कटाध्वरिः
	३. विश्वगुणादर्शचम्पूः	३. सोमदेवसूरिः
	४. चम्पूभारतम्	४. भोजदेवः
	५. यशस्तिलकचम्पूः	५. त्रिविक्रमभट्टः
IV	१. नभःस्पृशं दीप्तम्	१. रामकृष्णाश्रमः
	२. योगक्षेमं वहाम्यहम्	२. राष्ट्रिय संस्कृत संस्थानम्
	३. तन्नो हंसः प्रचोदयात्	३. जीवविमासंस्था
	४. योऽनूचानः स नो महान्	४. भारतसर्वेकारः
	५. सत्यमेव जयते	५. भारतीयं वायुदलम्

उत्तराणि–

·२ (५ ·२ (२ ·१ (३ ·३ (२ ·५ (१ ∧! ·३ (५ ·१ (२ ·२ (३ ·५ (२ ·१ (१ !!!

·३ (५ ·१ (२ ·२ (३ ·२ (२ ·५ (१ !! ·२ (५ ५ (२ .२ (३ ·१ (२ ·३ (१ !

रसप्रश्नाः–

एतेषां कः क्रमः ?

[अधः विभिन्नाः गणा सूचिताः सन्ति। गणस्थानां पदानां कश्चन पौर्वापर्यक्रमः अस्ति। तदनुगुणम् एतान् योजयन्तु।]

I १. अरण्यकाण्डम् २. अयोध्याकाण्डम् ३. बालकाण्डम्
४. सुन्दरकाण्डम् ५. युद्धकाण्डम् ६. किष्किन्धाकाण्डम्

II १. लवः २. दशरथः ३. अजः ४. रामः ५. दिलीपः
६. अग्निवर्णः

III १. आनन्दवर्धनः २. वामनः ३. अभिनवगुप्तः ४. दण्डी
५. जगन्नाथः

IV १. पतञ्जलिः २. पाणिनिः ३. नागेशः ४. भट्टोजिदीक्षितः
५. वररुचिः ६. शाकल्यः

V १. मत्स्यः २. वराहः ३. कूर्मः ४. वामनः ५. कल्किः
६. बुद्धः

VI १. नकुलः २. अर्जुनः ३. भीमसेनः ४. धर्मराजः ५. सहदेवः

VII १. अतलः २. पातालः ३. सुतलः ४. रसातलः
५. महातलः ६. तलातलः ७. वितलः

VIII १. ऋषभः २. निषादः ३. मध्यमः ४. गान्धारः
५. षड्जः ६. धैवतः ७. पञ्चमः

IX १. पृथिवी २. वायुः ३. जलम् ४. आकाशः ५. तेजः

X १. नियमः २. यमः ३. आसनम् ४. समाधिः ५. धारणम्
६. ध्यानम् ७. प्राणायामः ८. प्रत्याहारः

उत्तराणि–

X ·४ ·५ ·३ ·२ ·७ ·६ ·१ ·८

XI ·४ ·८ ·५ ·६ ·१

IIIV ·८ ·३ ·७ ·६ ·४ ·१ ·५

IIV ·८ ·५ ·३ ·४ ·६ ·७ ·१

IV ·५ ·१ ·८ ·६ ·४

V ·५ ·६ ·४ ·८ ·१

VI ·६ ·४ ·५ ·१ ·८ ·३

I ·५ ·४ ·३ ·१ ·८ ·६

II ·३ ·१ ·४ ·८ ·६ ·५

रसप्रश्नाः-

एते के?

(अत्र केचन पुराणेतिहासप्रसिद्धाः पुरुषाः उल्लिखिताः सन्ति। तेषां परिचय-प्राप्त्यर्थं विकल्पत्रयं सूचितम् अस्ति। युक्तस्य उत्तरस्य अन्वेषणं कुर्वन्तु।)

I भगीरथः - १. भागीरथ्याः पुत्रः २. दिलीपस्य पुत्रः ३. सगरस्य पिता।

II अष्टावक्रः - १. श्वेतकेतोः पिता २. विकाररूपः भिक्षुकः ३. उद्दालकमुनेः पौत्रः

III अश्वपतिः - १. कैकेय्याः पिता २. दशरथस्य आस्थाने अश्वसेनापतिः ३. श्रेष्ठः अश्वः

IV पराशरः - १. वशिष्ठस्य पुत्रः २. वशिष्ठस्य पौत्रः ३. धनुर्विद्याप्रवीणः सेनापतिः

V कौत्सः - १. पुरुकुत्सस्य पिता २. भृगुवंशीयः ब्रह्मर्षिः ३. रघुमहाराजस्य पुरोहितः

VI जनमेजयः - १. व्यासस्य पिता २. जनकराजस्य पिता ३. परीक्षिदराजस्य पुत्रः

VII रन्तिदेवः - १. संकृतिराजस्य पुत्रः २. रन्तिनामिकायाः स्त्रियः पतिः ३. पाण्डवानां पितामहः

VIII ययातिः - १. देवयान्याः पुत्रः २. सूर्यवंशीयः चक्रवर्ती ३. नहुषराजस्य पुत्रः

IX मान्धाता - १. चतुर्दशमनुषु अन्यतमः २. यवनाश्वस्य पुत्रः ३. यवनाश्वस्य पिता

X सुग्रीवः - १. रुमायाः पतिः २. हनूमतः अग्रजः ३. जाम्बवतः पुत्रः

१ - X २ - XI ३ - IIIA ४ - IIA ५ - IA

६ - A ७ - AI ८ - III ९ - II १० - I — [illegible]

रसप्रश्नाः–

एते कुत्र निलीनाः?

[अधः अष्ट गणाः निर्दिष्टाः सन्ति। एकैकस्मिन् गणे अपि व्यक्तित्रयं निलीनम् अस्ति। व्यक्तीनां नाम्नाम् अक्षराणि व्यस्ततया स्थापितानि। तानि अक्षराणि क्रमशः स्थापयन्तः व्यक्तीनाम् अन्वेषणं कुर्वन्तु।]

१. प्रसिद्धकवयः –

का भा ज लि दा र सः वि: य दे व:

२. वैयाकरणाः –

पा प व ज्ञ नि: त र चि: णि लि: ङ

३. रामायणसम्बन्धिनः –

द सु श कौ म र स थ: न्त्र: स्या:

४. महाभारतसम्बन्धिनः -

ध दु गा र्यो र्म न्धा रा री ध ज: न:

५. ऋषयः –

वि वा श्वा व म मि शि त्र: दे ष्ठ: व:

६. कवयित्र्यः –

ति वि ग ङ्गि ङ्गा म दे ला का म्बा वी

७. देव्यः –

पा स ल ती क्ष्मी र्व दे स्व वी तौ

८. विष्णोः अवतारा:–

ब न वा र रा म सि न: ह: ह:

उत्तराणि–

१. कालिदासः, भारविः, जयदेवः
२. पाणिनिः, पतञ्जलिः, वरदराजः
३. दशरथः, सुमन्त्रः, कौसल्या
४. धर्मराजः, दुर्योधनः, गान्धारी
५. विश्वामित्रः, वाल्मीकिः, वसिष्ठः
६. पण्डिता, सरस्वती, लक्ष्मीदेवी
७. राजीवः, नरसिंहः, वामनः
८. मत्स्यावतारः, बलिराजा, गङ्गादेवी

रसप्रश्नाः –

युक्तः सम्बन्धशब्दः कः?

(अधः अष्ट प्रश्नाः सन्ति। एकैकत्र अपि एकैकः शब्दः पूरणीयः। प्रथमपङ्क्तेः साम्येन द्वितीयपङ्क्तौ एकं शब्दं पूरयन्तु।)

यथा – रामः - दशरथः। कृष्णः - वसुदेवः।
(रामस्य पिता दशरथः, तथैव कृष्णस्य पिता वसुदेवः)

१. चन्दमामा - मासपत्रिका।
संस्कृतभवितव्यम् ----------।
२. 'श्रु' धातोः वर्तमानकालरूपं - शृणोति।
,, ,, भविष्यत्कालरूपं ----------।
३. गङ्गालहरी - स्तोत्रकाव्यं - जगन्नाथः।
मेघदूतम् ---------- -------।
४. गच्छति - वर्तमानकालिकं क्रियापदम्।
गतवान् ----------।
५. व्याकरणे सूत्राणि - पाणिनिः।
व्याकरणे वार्तिकानि ----------।
६. भट्टिकाव्यम् - रावणवधः।
अमरकोषः ----------।
७. सत्त्वः, रजः, तमः - गुणत्रयम्।
ब्रह्मसूत्राणि, भगवद्गीता, उपनिषदः ---------।
८. प्रसिद्धाः उपनिषदः - दश।
प्रसिद्धानि पुराणानि ----------।

(उत्तराणि:– १. चान्दामिकपत्रिका। २. शोभते। ३. ब्रह्मकाव्य-कालिदासः। ४. प्रस्थानत्रयम्। ५. वरदराजः। ६. रामायणेतिहासपुराणानाम्। ७. प्रस्थानत्रयम्। ८. अष्टादश।

रसप्रश्नाः

किम् उत्तरम् एतेषाम्?

१. संस्कृते अतिप्राचीनस्य रूपकस्य नाम किम्?

२. कादम्बरी (गद्य) ग्रन्थस्य आकरग्रन्थः कः?

३. गद्यकाव्ये कति प्रकाराः?

४. व्याकरणमहाभाष्ये उल्लिखितौ गद्यग्रन्थौ कौ?

५. उपलभ्यमानेषु गद्यग्रन्थेषु प्राचीनतमः कः?

६. बृहत्कथा कया भाषया लिखिता अस्ति?

७. संस्कृतस्य प्रथमः चम्पूग्रन्थः कः?

८. हितोपदेशस्य कर्ता कः?

९. शाकुन्लनाटकस्य नाम कविना किम् इति निर्दिष्टम्?

१०. कालिदासस्य खण्डकाव्यद्वयस्य नाम किम्?

उत्तराणि-

१. शारीपुत्रप्रकरणम्, २. बृहत्कथा, ३. कथा आख्यायिका इति प्रकारद्वयम्, ४. कंसवधम् बलिबन्धः च, ५. वासवदत्ता, ६. पैशाचीभाषया, ७. नलचम्पूः, ८. नारायणभट्टः, ९. अभिज्ञानशाकुन्तलम्, १०. मेघदूतम्, ऋतुसंहारः।

रसप्रश्नाः

प्रतीकेषु संस्कृतवाक्यानि

(प्रतीकेषु उपयुक्तानि संस्कृतवाक्यानि कानिचन अत्र सङ्गृहीतानि। एकस्मिन् पार्श्वे वाक्यानि सन्ति। अपरस्मिन् पार्श्वे संस्थानां नामानि सन्ति, याभिः तानि वाक्यानि स्वप्रतीके उपयुक्तानि। संस्थां वाक्यं च परस्परं योजयन्तु)

I सत्यमेव जयते	१ राष्ट्रिय संस्कृत सस्थनम्
II नभःस्पृशं दीप्तम्	२ जीवविमासंस्था
III बहुजनहिताय	३ रामकृष्णाश्रमः
IV योऽनूचानः स नो महान्	४ भारतीयवायुदलम्
V तमसो मा ज्योतिर्गमय	५ भारतीयजलसेना
VI तन्नो हंसः प्रयोदयात्	६ भारतसर्वकारः
VII योगक्षेमं वहाम्यहम्	७ विश्व हिन्दु परिषद्
VIII शं नो वरुणः	८ मैसूरु विश्वविद्यालयः
IX धर्मो रक्षति रक्षितः	९ आकाशवाणी
X न हि ज्ञानेन सदृशम्	१० चौखाम्बा प्रकाशनम्

उत्तराणि

I-६, II–४, III–९, IV–१, V–१०, VI–३, VII–२, VIII–५, IX–७, X–८.

रसप्रश्नाः

ग्रन्थानाम् एतेषां कः विषयः?

(अत्र केषाञ्चित् ग्रन्थानां नाम लिखितम् अस्ति। तेषां विषयविषये त्रयः विकल्पाः दत्ताः सन्ति। योग्यम् एकं चिन्वन्तु)

I वेणीसंहारः	१. 'वेणी' इत्यस्य राक्षसस्य संहारः
	२. शत्रोः रक्तेन केशवेशरचनार्थं शपथः
	३. वेण्याः अपहरणम्
II ऋत्संहारः	१. ऋतूनां वर्णनम्
	२. ऋतुनामकस्य संहारः
	३. परिसरमालिन्यविषयकः ग्रन्थः
III हलायुधः	१. बलरामम् अधिकृत्य लिखितः ग्रन्थः
	२. कश्चन प्रसिद्धः कोषः
	३. आयुधानि अधिकृत्य लिखितः ग्रन्थः
IV खण्डनखण्डखाद्यम्	१. पाकशास्त्रग्रन्थः
	२. सस्यशास्त्रग्रन्थः
	३. अद्वैतविमर्शग्रन्थः
V समयमातृका	१. ज्योतिःशास्त्रग्रन्थः
	२. स्त्रीशिक्षणसम्बन्धी ग्रन्थः
	३. विडम्बनकाव्यम्
VI पीयूषलहरी	१. नर्मदास्तोत्रं विषयः
	२. अमृतमन्थनं विषयः
	३. गङ्गास्तोत्रं विषयः

उत्तराणिः– I-२, II-१, III-२, IV-३, V-३, VI-१.

रसप्रश्नाः

परस्परं योजयन्तु।

(अधः केचन श्लोकखण्डाः वाक्यानि वा उल्लिखिताः सन्ति। 'अ' विभागे अर्धम् अस्ति। अवशिष्टं च 'ब' विभागे। वाक्यखण्डान् परस्परं युक्तं योजयन्तु।)

'अ'	'ब'
१. अर्थमनर्थं	१. ध्रुवं जन्म मृतस्य च।
२. उपायेन हि यच्छक्यं	२. मा गृदः कस्यस्विद् धनम्।
३. क्रियासिद्धिः सत्त्वे	३. कोऽर्थवान् को दरिद्रः?
४. क्षीयन्ते खलु भूषणानि	४. भावय नित्यम्।
५. जातस्य हि ध्रुवो मृत्युः	५. किं न करोति पुंसाम्।
६. न कूपखननं युक्तं	६. अपि न चलति।
७. न दैवमिति सञ्चिन्त्य	७. न तच्छक्यं पराक्रमैः।
८. परिवर्तिनि संसारे	८. केवलादी।
९. विकारहेतौ सति विक्रियन्ते	९. भवति महतां नोपकरणे।
१०. सत्सङ्गतिः कथय	१०. मृतः को वा न जायते?
११. तातस्य कूपोऽयमिति ब्रुवाणाः	११. प्रदीप्ते वह्निना गृहे।
१२. तेन त्यक्तेन भुञ्जीथाः	१२. येषां न चेतांसि त एव धीराः।
१३. केवलाघो भवति	१३. क्षारं जलं कापुरुषाः पिबन्ति।
१४. तेन विना तृणम्	१४. त्यजेदुद्योगमात्मनः।
१५. मनसि च परितुष्टे	१५. सततं वाग्भूषणं भूषणम्।

उत्तराणि –

१-४. २-७. ३-९. ४-१५. ५-१. ६-११. ७-१४. ८-१०. ९-१२. १०-५. ११-१३. १२-२. १३-८. १४-६. १५-३.

रसप्रश्नाः–

एते कुत्र निलीनाः?

[अधः अष्ट गणाः निर्दिष्टाः सन्ति। एकैकस्मिन् गणे अपि व्यक्तित्रयं निलीनम् अस्ति। व्यक्तीनां नाम्नाम् अक्षराणि व्यस्ततया स्थापितानि। तानि अक्षराणि क्रमशः स्थापयन्तः व्यक्तीनाम् अन्वेषणं कुर्वन्तु।]

१. प्रसिद्धकवयः –

का भा ज लि दा र सः वि: य दे व:

२. वैयाकरणाः –

पा प व ज्ञ नि: त र चि: णि लि: ङ

३. रामायणसम्बन्धिनः –

द सु श कौ म र स थ: न्त्र: स्या:

४. महाभारतसम्बन्धिनः -

ध दु गा र्यो र्म न्धा रा री ध ज: न:

५. ऋषयः –

वि वा श्वा व म मि शि त्र: दे ष्ठ: व:

६. कवयित्र्यः –

ति वि ग ङ्गि ङ्गा म दे ला का म्बा वी

७. देव्यः –

पा स ल ती क्ष्मी र्व दे स्व वी तौ

८. विष्णोः अवतारा:–

ब न वा र रा म सि न: ह: ह:

उत्तराणि–

१. कालिदासः, भारविः, जयदेवः
२. पाणिनिः, पतञ्जलिः, वरदराजः
३. दशरथः, सुमन्त्रः, कौसल्या
४. धर्मराजः, दुर्योधनः, गान्धारी
५. विश्वामित्रः, वाल्मीकिः, वसिष्ठः
६. पण्डिता, सरस्वती, लक्ष्मीदेवी
७. राजीवः, नरसिंहः, वामनः
८. मत्स्यावतारः, बलिराजा, गङ्गादेवी

रसप्रश्नाः –

युक्तः सम्बन्धशब्दः कः?

(अधः अष्ट प्रश्नाः सन्ति। एकैकत्र अपि एकैकः शब्दः पूरणीयः। प्रथमपङ्क्तेः साम्येन द्वितीयपङ्क्तौ एकं शब्दं पूरयन्तु।)

यथा – रामः - दशरथः। कृष्णः - वसुदेवः।
(रामस्य पिता दशरथः, तथैव कृष्णस्य पिता वसुदेवः)

१. चन्दमामा - मासपत्रिका।
संस्कृतभवितव्यम् ----------।
२. 'श्रु' धातोः वर्तमानकालरूपं - शृणोति।
,, ,, भविष्यत्कालरूपं ----------।
३. गङ्गालहरी - स्तोत्रकाव्यं - जगन्नाथः।
मेघदूतम् ---------- -------।
४. गच्छति - वर्तमानकालिकं क्रियापदम्।
गतवान् ----------।
५. व्याकरणे सूत्राणि - पाणिनिः।
व्याकरणे वार्तिकानि ----------।
६. भट्टिकाव्यम् - रावणवधः।
अमरकोषः ----------।
७. सत्त्वः, रजः, तमः - गुणत्रयम्।
ब्रह्मसूत्राणि, भगवद्गीता, उपनिषदः ---------।
८. प्रसिद्धाः उपनिषदः - दश।
प्रसिद्धानि पुराणानि ----------।

(उत्तराणि:– १. चान्दामिकपत्रिका। २. शोभते। ३. ब्रह्मकाव्य-कालिदासः। ४. प्रस्थानत्रयम्। ५. वरदराजः। ६. रामायणेतिहासपुराणानाम्। ७. प्रस्थानत्रयम्। ८. अष्टादश।

रसप्रश्नाः

किम् उत्तरम् एतेषाम्?

१. संस्कृते अतिप्राचीनस्य रूपकस्य नाम किम्?

२. कादम्बरी (गद्य) ग्रन्थस्य आकरग्रन्थः कः?

३. गद्यकाव्ये कति प्रकाराः?

४. व्याकरणमहाभाष्ये उल्लिखितौ गद्यग्रन्थौ कौ?

५. उपलभ्यमानेषु गद्यग्रन्थेषु प्राचीनतमः कः?

६. बृहत्कथा कया भाषया लिखिता अस्ति?

७. संस्कृतस्य प्रथमः चम्पूग्रन्थः कः?

८. हितोपदेशस्य कर्ता कः?

९. शाकुन्लनाटकस्य नाम कविना किम् इति निर्दिष्टम्?

१०. कालिदासस्य खण्डकाव्यद्वयस्य नाम किम्?

उत्तराणि-

१. शारीपुत्रप्रकरणम्, २. बृहत्कथा, ३. कथा आख्यायिका इति प्रकारद्वयम्, ४. कंसवधम् बलिबन्धः च, ५. वासवदत्ता, ६. पैशाचीभाषया, ७. नलचम्पूः, ८. नारायणभट्टः, ९. अभिज्ञानशाकुन्तलम्, १०. मेघदूतम्, ऋतुसंहारः।

रसप्रश्नाः

प्रतीकेषु संस्कृतवाक्यानि

(प्रतीकेषु उपयुक्तानि संस्कृतवाक्यानि कानिचन अत्र सङ्गृहीतानि। एकस्मिन् पार्श्वे वाक्यानि सन्ति। अपरस्मिन् पार्श्वे संस्थानां नामानि सन्ति, याभिः तानि वाक्यानि स्वप्रतीके उपयुक्तानि। संस्थां वाक्यं च परस्परं योजयन्तु)

I सत्यमेव जयते	१ राष्ट्रिय संस्कृत सस्थनम्
II नभःस्पृशं दीप्तम्	२ जीवविमासंस्था
III बहुजनहिताय	३ रामकृष्णाश्रमः
IV योऽनूचानः स नो महान्	४ भारतीयवायुदलम्
V तमसो मा ज्योतिर्गमय	५ भारतीयजलसेना
VI तन्नो हंसः प्रयोदयात्	६ भारतसर्वकारः
VII योगक्षेमं वहाम्यहम्	७ विश्व हिन्दु परिषद्
VIII शं नो वरुणः	८ मैसूरु विश्वविद्यालयः
IX धर्मो रक्षति रक्षितः	९ आकाशवाणी
X न हि ज्ञानेन सदृशम्	१० चौखाम्बा प्रकाशनम्

उत्तराणि

I-६, II–४, III–९, IV–१, V–१०, VI–३, VII–२, VIII–५, IX–७, X–८.

रसप्रश्नाः

ग्रन्थानाम् एतेषां कः विषयः?

(अत्र केषाञ्चित् ग्रन्थानां नाम लिखितम् अस्ति। तेषां विषयविषये त्रयः विकल्पाः दत्ताः सन्ति। योग्यम् एकं चिन्वन्तु)

I वेणीसंहारः	१. 'वेणी' इत्यस्य राक्षसस्य संहारः
	२. शत्रोः रक्तेन केशवेशरचनार्थं शपथः
	३. वेण्याः अपहरणम्
II ऋत्संहारः	१. ऋतूनां वर्णनम्
	२. ऋतुनामकस्य संहारः
	३. परिसरमालिन्यविषयकः ग्रन्थः
III हलायुधः	१. बलरामम् अधिकृत्य लिखितः ग्रन्थः
	२. कश्चन प्रसिद्धः कोषः
	३. आयुधानि अधिकृत्य लिखितः ग्रन्थः
IV खण्डनखण्डखाद्यम्	१. पाकशास्त्रग्रन्थः
	२. सस्यशास्त्रग्रन्थः
	३. अद्वैतविमर्शग्रन्थः
V समयमातृका	१. ज्योतिःशास्त्रग्रन्थः
	२. स्त्रीशिक्षणसम्बन्धी ग्रन्थः
	३. विडम्बनकाव्यम्
VI पीयूषलहरी	१. नर्मदास्तोत्रं विषयः
	२. अमृतमन्थनं विषयः
	३. गङ्गास्तोत्रं विषयः

उत्तराणिः– I-२, II-१, III-२, IV-३, V-३, VI-१.

रसप्रश्नाः

परस्परं योजयन्तु।

(अधः केचन श्लोकखण्डाः वाक्यानि वा उल्लिखिताः सन्ति। 'अ' विभागे अर्धम् अस्ति। अवशिष्टं च 'ब' विभागे। वाक्यखण्डान् परस्परं युक्तं योजयन्तु।)

'अ'	'ब'
१. अर्थमनर्थं	१. ध्रुवं जन्म मृतस्य च।
२. उपायेन हि यच्छक्यं	२. मा गृदः कस्यस्विद् धनम्।
३. क्रियासिद्धिः सत्त्वे	३. कोऽर्थवान् को दरिद्रः?
४. क्षीयन्ते खलु भूषणानि	४. भावय नित्यम्।
५. जातस्य हि ध्रुवो मृत्युः	५. किं न करोति पुंसाम्।
६. न कूपखननं युक्तं	६. अपि न चलति।
७. न दैवमिति सञ्चिन्त्य	७. न तच्छक्यं पराक्रमैः।
८. परिवर्तिनि संसारे	८. केवलादी।
९. विकारहेतौ सति विक्रियन्ते	९. भवति महतां नोपकरणे।
१०. सत्सङ्गतिः कथय	१०. मृतः को वा न जायते?
११. तातस्य कूपोऽयमिति ब्रुवाणाः	११. प्रदीप्ते वह्निना गृहे।
१२. तेन त्यक्तेन भुञ्जीथाः	१२. येषां न चेतांसि त एव धीराः।
१३. केवलाघो भवति	१३. क्षारं जलं कापुरुषाः पिबन्ति।
१४. तेन विना तृणम्	१४. त्यजेदुद्योगमात्मनः।
१५. मनसि च परितुष्टे	१५. सततं वाग्भूषणं भूषणम्।

उत्तराणि –

१-४. २-७. ३-९. ४-१५. ५-१. ६-११. ७-१४. ८-१०. ९-१२. १०-५. ११-१३. १२-२. १३-८. १४-६. १५-३.

रसप्रश्नाः

युक्तम् उत्तरं किम्?

(अधः केचन प्रश्नाः दत्ताः सन्ति। तेषाम् उत्तररूपेण विकल्पत्रयं सूचितम् अस्ति। युक्तस्य उत्तरस्य अन्वेषणं कुर्वन्तु)

१) पञ्चमहाकाव्येषु कालिदासस्य महाकाव्यद्वयं प्रविष्टम्। तयोः नाम किम्?

(१. रघुवंशः कुमारसम्भवः च। २. रघुवंशः शाकुन्तलं च। ३. शाकुन्तलं कुमारसम्भवः च।)

२) भगवद्गीता महाभारतस्य कस्मिन् पर्वणि प्रविशति?

(१. विराटपर्वणि। २. भीष्मपर्वणि। ३. शान्तिपर्वणि।)

३) कालिदासः कया बिरुदा प्रसिद्धः अस्ति?

(१. 'उपमा'कालिदासः। २. 'दीपशिखा'कालिदासः। ३. 'भोज'कालिदासः।)

४) महाभारतस्य मूलस्वरूपस्य किं नाम?

(१. महाभारतम् इत्येव। २. भारतम् इति। ३. जयः इति।)

५) आदिकाव्यम् इति कस्य काव्यस्य नाम?

(१. रघुवंशस्य। २. रामायणस्य। ३. महाभारतस्य।)

६) भारविकाव्यस्य वैशिष्ट्यं किम्?

(१. उपमालङ्कारः। २. पदलालित्यम्। ३. अर्थगौरवम्।)

७) भासस्य 'पञ्चरात्रम्' कीदृशं रूपकम्?

(१. व्यायोगः। २. समवकारः। ३. नाटकम्।)

८) 'ऋतुसंहारः' एतत् कीदृशं काव्यम्?

(१. महाकाव्यम्। २. खण्डकाव्यम्। ३. चम्पूकाव्यम्।)

९) 'भट्टिकाव्यम्' इति कस्य ग्रन्थस्य नाम?

(१. रावणवधस्य। २. शिशुपालवधस्य। ३. किरातार्जुनीयस्य।)

उत्तराणि –

(१) १. (२) २. (३) २. (४) ३. (५) २. (६) ३. (७) २. (८) २. (९) १.

रसप्रश्नाः

सुप्रसिद्धाः के एते?

(अधः दम्पत्योः नाम सूचितम् अस्ति। तयोः पुत्रः पुत्री वा सुप्रसिद्धौ। सुप्रसिद्धानाम् एतेषां परिचयप्राप्त्यर्थम् एकैकं वाक्यम् अपि अधः सूचितम् अस्ति। ते के इति ज्ञातुं प्रयत्नं कुर्वन्तु।)

१. * मातापितरौ– सत्यवती-पराशरः।
   * इतिहासत्वेन प्रसिद्धम् एकं ग्रन्थं लिखितवान्।

२. * मातापितरौ– कृपी-द्रोणाचार्यः।
   * क्षत्रियराजानां नाशार्थं बहुवारं भूपरिक्रमणं कृतवान्।

३. * मातापितरौ– इतरा-माण्डूकिमुनिः।
   * एतस्य नाम्ना एका उपनिषत् प्रसिद्धा अस्ति।

४. * मातापितरौ– शान्तिः-अथर्वणः।
   * देवतानां हितार्थम् स्वकीयानि अस्थीनि एव अर्पितवान्।

५. * मातापितरौ– अदृश्यन्ती-शक्तिमहर्षिः।
   * स्मृतिकारेषु अन्यतमः एषः।

६. * मातापितरौ– अनसूया-अत्रिमहर्षिः।
   * कोपविषये सुप्रसिद्धः महर्षिः।

७. * मातापितरौ– देवहूतिः-कर्दममुनिः।
   * पतिव्रतास्त्रीषु अन्यतमा। ब्रह्मविष्णुमहेश्वरान् शिशून् कृतवती आसीत्।

८. * मातापितरौ– सुमतिः-सगरचक्रवर्ती।
   * औद्धत्येन ख्यातः, पित्रा राज्यात् बहिष्कृतः च आसीत्।

९. * मातापितरौ– कला-मरीचिमहर्षिः।
   * सप्तर्षिषु अन्यतमः।

उत्तराणि–

१. व्यासः। २. अश्वत्थामा। ३. ऐतरेयः। ४. दधीचिः। ५. पराशरः।
६. दुर्वासाः। ७. अनसूया। ८. असमञ्जः।९. कश्यपः।

रसप्रश्नाः

गणे अनर्हः कः?

(अधः त्रयाणां केचन गणाः लिखिताः सन्ति। किन्तु गणे अनर्हः एकः अन्योऽपि शब्दः तत्र प्रविष्टः अस्ति। सः कः शब्दः इति अन्वेषणं कुर्वन्तु। किमर्थं सः तस्मिन् गणे प्रवेशं न अर्हति इत्यपि सूचयन्तु।)

१. ब्रह्मा, विष्णुः, महेश्वरः, देवेन्द्रः।

२. स्वर्गः, मर्त्यः, आकाशः, पातालः।

३. धर्मः, अर्थः, मोक्षः, मरणम्, कामः।

४. ब्रह्मचर्यं, कौमारम्, संन्यासः, वानप्रस्थं, गार्हस्थ्यम्।

५. सेनानी, पादातिः, रथः, अश्वः, गजः।

६. दक्षिणः, गार्हपत्यः, कृष्णवर्त्मा, आहवनीयः।

७. तिथिः, दिनाङ्कः, वासरः, योगः, करणम्, नक्षत्रम्।

८. क्षीरं, शर्करा, घृतं, जलम्, दधि, मधु।

९. विष्णुः, शङ्करः, ब्रह्मा, देवी, गणपतिः, सूर्यः।

१०. पृथिवी, जलं, तेजः, नक्षत्राणि, वायुः, आकाशः।

उत्तराणि –

१. देवेन्द्रः– त्रिमूर्तिषु न प्रविशति।
२. आकाशः– लोकः न।
३. मरणं– पुरुषार्थः न।
४. कौमारम्– आश्रमः न।
५. सेनानी– चतुरङ्गेषु न प्रविशति।
६. कृष्णवर्त्मा– त्रेताग्निषु न प्रविशति।
७. दिनाङ्कः– पञ्चाङ्गस्य अङ्गत्वं नास्ति एतस्य।
८. जलम्– पञ्चामृतस्य अङ्गत्वं नास्ति।
९. ब्रह्मा– पञ्चायतनपूजायाम् एतस्य पूजा नास्ति।
१०. नक्षत्राणि– पञ्चभूतेषु अन्यतमानि न।

रसप्रश्नाः

महापुरुषाणां मूलनाम

(अधः केचन महापुरुषाः निर्दिष्टाः सन्ति। तेषां मूलनाम अन्यदेव आसीत्। तान्यपि पार्श्वे लिखितानि सन्ति। प्रसिद्धपुरुषस्य नाम, तदीयं बाल्यनाम च परस्परं योजयन्तु।)

१. स्वामी विवेकानन्दः	१. पुरन्दरः
२. रामकृष्ण परमहंसः	२. वर्धमानः
३. तुलसीदासः	३. मनु (छबीली)
४. आद्यशङ्कराचार्यः	४. नरेन्द्रनाथ दत्तः
५. अमात्यराक्षसः	५. विनायकः
६. महावीरः तीर्थङ्करः	६. देवव्रतः
७. झाँसी राज्ञी लक्ष्मीबाई	७. गदाधरः
८. महात्मा गान्धी	८. रामबोला
९. विद्यारण्यः	९. मेघनादः
१०. भीष्मः	१०. शङ्करः
११. विश्वामित्रः	११. सिद्धार्थः
१२. इन्द्रजित् (रावणस्य पुत्रः)	१२. माधवः
१३. गौतमबुद्धः	१३. मोहनदासः
१४. इन्द्रः (वर्तमानकालीनः)	१४. सुबुद्धिः
१५. वीर सारवकरः	१५. कौशिकः

उत्तराणि—

१.-४, २.-७, ३.-८, ४.-१०, ५.-१४, ६.-२, ७.-३, ८.-१३, ९.-१२, १०.-६ ११.-१५, १२.-९, १३.-११, १४.-१, १५.-५.

रसप्रश्नाः

गुरुशिष्यपरम्परा

(भारतीये इतिहासे गुरुशिष्याणाम् एका विशिष्टा परम्परा अस्ति। कुत्रचित् गुरोः नामबलेन शिष्यः प्रसिद्धिं गतः। अन्यत्र कुत्रचित् शिष्यस्य प्रसिद्धेः कारणतः गुरोः अपि ख्यातिः। अधः 'अ' भागे शिष्याः, 'ब' भागे गुरवः च निर्दिष्टाः सन्ति। शिष्यं गुरुणा योजयन्तु।)

'अ'	'ब'
१. एकलव्यः	१. गोविन्दभगवत्पादः
२. कौत्सः	२. रामकृष्णपरमहंसः
३. रामकृष्णपरमहंसः	३. धौम्यः
४. चन्द्रगुप्तः	४. भीष्मः
५. कृष्णः	५. तोतापुरी
६. उद्दालकः	६. यमः
७. कचः	७. वरतन्तुः
८. परशुरामः	८. वाल्मीकिः
९. विवेकानन्दः	९. व्यासः
१०. शङ्कराचार्यः	१०. वर्षाचार्यः
११. नचिकेताः	११. चाणक्यः
१२. वैशम्पायनः	१२. द्रोणः
१३. लवः कुशः च	१३. समर्थरामदासः
१४. पाणिनिः	१४. शुक्राचार्यः
१५. छत्रपतिः शिवाजी	१५. सान्दीपनः

उत्तराणि–

१–१२. २–७. ३–५. ४–११. ५–१५. ६–३. ७–१४. ८–४. ९–२.
१०–१. ११–६. १२–९. १३–८. १४–१०. १५–१३.



रसप्रश्नाः

वाल्मीकिः मुनिपुङ्गवः

(वाल्मीकिजीवनसम्बन्धे रामायणारम्भसम्बन्धे च अत्र केचन प्रश्नाः सन्ति। उत्तरम् अपि अधः सूचितम् एव। उत्तरस्य विकल्पत्रयम् अस्ति। युक्तम् उत्तरं सूचयन्तु)

I वाल्मीकेः आश्रमः कस्याः नद्याः तीरे अस्ति?
(१. गङ्गानदीतीरे। २. तमसातीरे। ३. गोदावरीतीरे।)

II वाल्मीकेः पितुः नाम किम्?
(१. वल्मीकः। २. प्रचेताः। ३. भरद्वाजः।)

III रामकथां वाल्मीकये कः उक्तवान्?
(१. नारदः। २. ब्रह्मा। ३. महाविष्णुः।)

IV वाल्मीकिना दृष्टः क्रौञ्चवधः कस्मिन् समये प्रवृत्तः?
(१. उषःकाले। २. मध्याह्ने। ३. सायं प्रदोषसमये।)

V क्रौञ्चवधसन्दर्भे वाल्मीकिना सह स्थितस्य शिष्यस्य नाम किम्?
(१. अगस्त्यः। २. गौतमः। ३. भरद्वाजः।)

VI 'मा निषाद.....' इत्ययं श्लोकःकस्मिन् छन्दसि अस्ति?
(१. आर्यावृत्ते। २. अनुष्टुब्वृत्ते। ३. विषमवृत्ते।)

VII वाल्मीकिः व्याधाय शापं दत्तवान् यतः–
(१. व्याधः प्राणिहिंसां कृतवान् आसीत्। २. क्रौञ्चपक्षी वाल्मीकेः प्रीतिपात्रम् आसीत्। ३. व्याधः काममोहितं पक्षिणं मारितवान् आसीत्।)

VIII वाल्मीकेः पुरतः ब्रह्मा कदा प्रत्यक्षम् अभवत्?
(१. क्रौञ्चवधतः पूर्वम्। २. क्रौञ्चवधसन्दर्भे। ३. क्रौञ्चवधानन्तरम्।)

IX वाल्मीकिना विरचितं रामायणं प्रथमं कौ गीतवन्तौ?
(१. कुशीलवौ। २. कुशलवौ। ३. अश्विनीकुमारौ।)

X वाल्मीकिः कस्मिन् युगे आसीत्?
(१. कृतयुगे। २. कलियुगे। ३. त्रेतायुगे।)

उत्तराणि – I–२. II–२. III–१. IV–२. V–३. VI–२. VII–३. VIII–३. IX–२. X–३.

रसप्रश्नाः

श्रीरामः रघुकुले जातः

(वाल्मीकिरामायणमुआधारीकृत्य दशरथस्य शासनतः आरभ्य रामजननपर्यन्तं स्थितस्य कथाभागस्य विषये अधः केचन प्रश्नाः प्रस्तुताः सन्ति। । समुचितम् उत्तरं सूचयन्तु।)

१. इक्ष्वाकुवंशस्य मूलपुरुषः कः?
२. अयोध्या कस्य देशस्य राजधानी?
३. अयोध्यानगरीं कः निर्मापितवान्?
४. दशरथः कस्य पुत्रः?
५. दशरथस्य कति मन्त्रिणः आसन्, येषु सुमन्त्रः अपि अन्यतमः?
६. दशरथस्य आस्थानपुरोहितयोः नाम किम्?
७. कौसल्यादेव्याः पितुः नाम किम्?
८. सुमित्रादेव्याः पिता शूरराजः कस्य देशस्य अधिपतिः?
९. केकयदेशीयायाः कैकेय्याः पितुः नाम किम्?
१०. ऋष्यशृङ्गः कस्य जामाता?
११. ऋष्य शृङ्गस्य आगमनकारणतः कस्मिन् देशे वृष्टिः आगता?
१२. अश्वमेधयागः पुत्रकामेष्टियागः च कस्याः नद्याः तीरे प्रवृतौ?
१३. यज्ञवेदिकातः आगतः कः दशरथाय पायसं दत्तवान्?
१४. सुमित्रया पायसस्य कतमः भागः प्राप्तः?
१५. रामस्य जन्म कस्यां तिथौ अभवत्?

उत्तराणि–

१. वैवस्वतः मनुः। २. कोसलदेशस्य।
३. मनुचक्रवर्ती। ४. अजमहाराजस्य। ५. अष्ट। ६. वसिष्ठः वामदेवः च।
७. भानुमान्।
८. मगधदेशस्य। ९. अश्वपतिः। १०. रोमपादः।
११. अङ्गदेशे। १२. सरयूनद्याः।
१३. प्राजापत्यः नरः। १४. ३/८ भागः।
१५. चैत्रशुक्लनवम्याम्।

रसप्रश्नाः

विश्वामित्रयागरक्षणम्

(रामलक्ष्मणौ विश्वामित्रस्य यागस्य रक्षणं कुरुतः। तं सन्दर्भम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः। उत्तररूपेण विकल्पत्रयं सूचितम् अस्ति। युक्तम् उत्तरं सूचयन्तु।)

I. विश्वामित्रः यागरक्षणार्थं रामलक्ष्मणयोः साहाय्यं प्रार्थितवान्। यतः—

१. सः ऋषिः इत्यतः युद्धविद्यां न जानाति।
२. यज्ञदीक्षितः इत्यतः शस्त्रप्रयोगं न करोति।
३. दशरथस्य परीक्षां कर्तुम् इच्छति।

II. 'रामलक्ष्मणौ प्रेषयतु' इति वसिष्ठः दशरथं सूचितवान्। यतः-

१. वसिष्ठः जानाति यत् विश्वामित्रः रामलक्ष्मणयोः कीर्तिं वर्धयितुम् इच्छति।
२. विश्वामित्रस्य कोपात् सः अतीव भीतः।
३. विश्वामित्रस्य विरोधं सः सर्वथा न इच्छति।

III. सरयूनद्याः तीरे विश्वामित्रतः रामलक्ष्मणाभ्यां प्राप्तयोः मन्त्रयोः नाम-

१. बलम् अतिबलं च इति। २. गायत्री सावित्री च इति। ३. अस्त्रं शस्त्रं च इति।

IV. विश्वामित्रः इति प्रसिद्धस्य कौशिकराजस्य पितुः नाम-

१. कुशः। २. कुशनाभः। ३. गाधिः।

V. ताटकायाः वासस्थानं दण्डकारण्यं यत्र अस्ति तत्र पूर्वं नगरद्वयम् आसीत्। तयोः नाम-

१. मलदः करूपः च इति। २. अङ्गदेशः वङ्गदेशः च इति।
३. कौशाम्बिः गिरिव्रजः च इति।

VI. रामः ताटकां कथं जघ्नवान्?

१. ब्रह्मास्त्रप्रयोगेण। २. शब्दवेधविद्यया। ३. सामान्यन अस्त्रेण।

उत्तराणि - I - २. II - १. III - १. IV - ३. V - १. VI - २.

रसप्रश्नाः

सीतापरिणयः

[विश्वामित्रयागरक्षणानन्तरं मिथिलागमनतः आरभ्य सीतापरिणयं समाप्य अयोध्यां प्रति आगमनपर्यन्तस्य कथाभागस्य आधारेण सज्जीकृताः केचन प्रश्नाः अधः उल्लिखिताः सन्ति। उत्तररूपेण विकल्पत्रयं सूचितम् अपि अस्ति। युक्तम् उत्तरं जानन्तु]

I विश्वामित्रयागस्य रक्षणकार्यं समाप्य मिथिलां प्रति प्रस्थितः रामः कस्याः पुण्यनद्याः कथां श्रुतवान्?

१. सरयूनद्याः। २. तमसानद्याः। ३. गङ्गानद्याः।

II मिथिलागमनमार्गे अहल्यायाः शापविमोचनं यत् अभवत् तत् कुत्र प्रवृत्तम्?

१. गौतमाश्रमस्य पुरतः। २. गौतमाश्रमे। ३. गौतमाश्रमसमीपे मार्गे।

III मिथिला कस्य देशस्य राजधानी?

१. विदेहस्य। २. कोसलस्य। ३. मगधस्य।

IV रामेण यत् शिवधनुः भञ्जितं तस्य नाम किम्?

१. शार्ङ्गम्। २. शुनाभः। ३. शिवधनुः इत्येव।

V रामः शिवधनुषः भङ्गं कस्मिन् सन्दर्भे कृतवान्?

१. स्वयंवरसन्दर्भे। २. जनकदर्शनानन्तरम्। ३. पूर्णायां राजसभायाम्।

VI भरतशत्रुघ्नयोः पत्न्योः माण्डवि-श्रुतकीर्त्योः पितुः नाम किम्?

१. जनकः। २. कुशध्वजः। ३. कुशनाभः।

VII रामः बाणप्रयोगेण परशुरामस्य किं सामर्थ्यं नाशितवान्?

१. तपःशक्तिम्। २. पादयोः कामगमनशक्तिम्। ३. समग्रं शरीरबलम्।

उत्तराणि–

I-३. II-२. III-१. IV-२. V-२. VI-२. VII-१.

रसप्रश्नाः

श्रीरामस्य वनगमनम्

[श्रीरामस्य वनगमनप्रसङ्गम् आधारीकृत्य अधः केचन प्रश्नाः सङ्गृहीताः। उत्तररूपेण विकल्पत्रयं सूचितम् अस्ति अपि। युक्तम् उत्तरं जानन्तु।]

I श्रीरामस्य वनगमनसमये भरतः स्वमातुलगहे आसीत्। तस्य मातुलस्य नाम किम्?
(१) युयुधानः। (२) युधाजित्। (३) यौवनाश्वः।

II श्रीरामस्य पट्टाभिषेकः कस्मिन् मासे निश्चितः आसीत्?
(१) चैत्रमासे। (२) कार्तीकमासे। (३) आश्वयुजमासे।

III कैकेयी दशरथात् वरद्वयं यत् प्राप्तवती तत् कस्मिन् सन्दर्भे?
(१) शम्बरासुरवधसन्दर्भे। (२) देवदानवयुद्धसन्दर्भे। (३) शम्बूकवधसन्दर्भे।

IV वनं प्रस्थिताः रामः लक्ष्मणः सीता च प्रथमां रात्रिं कुत्र यापितवन्तः?
(१) गङ्गानदीतीरे। (२) तमसानदीतीरे। (३) सरयूनदीतीरे।

V वनं गच्छतः रामस्य सत्कारं कृतवान् गुहः कस्य राज्यस्य अधिपतिः?
(१) शृङ्गाटकपुरस्य। (२) शोणितपुरस्य। (३) शृङ्गबेरपुरस्य।

VI वनवासार्थं चित्रकूटप्रदेशः एव उचितः इति कः मुनिः सूचितवान्?
(१) भरद्वाजः। (२) विश्वामित्रः (३) गौतमः।

VII वनं प्रस्थितवतां रामादीनां रथवाहकः सुमन्त्रः कियत्पर्यन्तम् अनुसृतवान्?
(१) तमसापर्यन्तम्। (२) गङ्गानदीपर्यन्तम्। (३) चित्रकूटपर्यन्तम्।

उत्तराणि–

I-२. II-१ III-१. IV-२. V-३. VI-१. VII-२.

रसप्रश्नाः-

चित्रकूटात् पञ्चवटीं प्रति

(चित्रकूटात् प्रस्थितः रामः पञ्चवटयां कुटीरं निर्माय निवसति। एतन्मध्ये प्रवृत्तां कथाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। उत्तररूपेण विकल्पत्रयं सूचितम् अस्ति अपि। युक्तम् उत्तरं जानन्तु)

I श्रीरामः चित्रकूटात् किमर्थं प्रस्थितवान्?
१. स च प्रदेशः वसत्यर्थम् अनुकूलकरः न इति।
२. अनुजस्य मातॄणां च स्मरणं तत्र पदे पदे बाधते इति।
३. राक्षसानां पीडां सोढुं न शक्यते इति।

II सीतां पातिव्रत्यधर्मं बोधितवत्याः अनसूयायाः पत्युः नाम किम्?
१. अगस्त्यमुनिः। २. अत्रिमुनिः। ३. जमदग्निमुनिः।

III विराधः नाम कुरूपी राक्षसः कुत्र दृष्टः?
१. दण्डकारण्ये। २. जनस्थानप्रान्ते। ३. विन्ध्यपर्वतप्रान्ते।

IV विराधस्य पूर्वजन्मनः स्वरूपं किम् आसीत्?
१. सः प्रजाकण्टकः राजा आसीत्।
२. इन्द्रस्य आस्थाने स्थितः यक्षः आसीत्।
३. कुबेरस्य आस्थाने स्थितः गन्धर्वः आसीत्।

V विराधस्य शापविमोचनं कथं जातम्?
१. श्रीरामस्य दर्शनमात्रेण।
२. श्रीरामः शिरच्छेदं यदा कृतवान् तदा।
३. श्रीरामः गर्ते यदा निखानितवान् तदा।

VI अप्सरोभिः वशीकृतः तपस्वी माण्डकर्णिः कुत्र निवसति स्म?
१. पम्पासरोवरे। २. पञ्चाप्सरःसरोवरे। ३. चम्पासरोवरे।

उत्तराणि–

I-२. II-२. III-१. IV-३. V-३. VI-२.

रसप्रश्नाः –

सीतापहरणम्

[रामस्य पञ्चवटीवासानन्तरं सीतापहरणपर्यन्तस्य रामायणकथाभागस्य आधारेण अत्र केचन प्रश्नाः सङ्गृहीताः। उत्तररूपेण विकल्पत्रयं सूचितम् अस्ति अपि। युक्तम् उत्तरं जानन्तु]

I सीतां मारयितुम् उद्युक्तायाः राक्षस्याः नासिकाकर्णादिच्छेदनं कृतवान् लक्ष्मणः। तस्याः नाम्नः शुद्धं स्वरूपं किम्?

१. शूर्पणखा। २. शूर्पणखी। ३. शूर्पनखा। ४. शूर्पनखी।

II तस्याः राक्षस्याः अग्रजः, यश्च रामेण हतः, कुत्र निवसति स्म?

१. लङ्कायाम्। २. जनस्थाने। ३. किष्किन्धायाम्।

III रामेण सह युद्धे मृतयोः खरस्य अनुचरयोः नाम किम्?

१. त्रिशिराः दूषणः च इति। २. सुबाहुः मारीचः च इति।

३. इल्वलः दूषणः च इति।

IV 'सीता अपहरणीया' इति कुतन्त्रं रावणाय कः बोधितवान्?

१. न कोऽपि, रावणस्य मनसि स्वयं स्फुरितम्।

२. राक्षसबन्धुः मारीचः।

३. खरस्य बन्धुः दूतत्वेन आगतः अकम्पनः।

V 'सीतापहरणे साहाय्यं करणीयम्' इति रावणस्य प्रार्थनां श्रुत्वा मारीचः किं कृतवान्?

१. 'एतादृशं चिन्तनम् अयुक्तम्' इति हितं बोधितवान्।

२. 'युक्तम् एतत्' इति प्रोत्साहकवचनानि उक्तवान्।

३. किमपि अनुक्त्वा कार्यार्थं सिद्धः जातः।

VI सीतां नयतः रावणस्य विरोधम् आचरितवतः गृध्रस्य नाम किम्?

१. गृध्रराजः। २. जटायुः। ३. सम्पातिः।

VII सीतया पातितानि आभरणानि कुत्र पतितानि?

१. ऋष्यमूकपर्वते। २. किष्किन्धानगरे। ३. कुत्रापि अरण्यमध्ये।

उत्तराणि –

I–१. II–२. III–१. IV–३. V–१. VI–२. VII–१.

रसप्रश्नाः –

सीतान्वेषणं सुग्रीवसख्यं च

[सीतापहरणानन्तरं अतीव दुःखितः रामः विलपन् सीतान्वेषणम् आरब्धवान्। तत्सन्दर्भे सः सुग्रीवस्य सख्यं प्राप्नोति। रामायणस्य एतत्सन्दर्भम् आधारीकृत्य अधः केचनः प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।]

I सीतान्वेषणपरः रामः कबन्धनामकेन राक्षसेन कुत्र मिलितवान्?

१. दण्डकारण्ये। २. क्रौञ्चारण्ये। ३. पञ्चवट्याम्।

II राक्षसस्य कबन्धस्य शापविमोचनं कदा अभवत्?

१. श्रीरामः शिरच्छेदं यदा कृतवान् तदा।

२. श्रीरामः यदा निखानितवान् तदा।

३. श्रीरामः अग्नौ दाहितवान् तदा।

III शापविमुक्तः कबन्धः सीतान्वेषणार्थं कम् उपायं सूचितवान्?

१. साक्षात् लङ्कायाः उपरि आक्रमणं करोतु इति।

२. सुग्रीवसख्यं सम्पाद्य तत्साहाय्येन लङ्कां जयतु इति।

३. कार्यसाफल्यार्थं दैवानुग्रहं सम्पादयतु इति।

IV अल्पसत्कारेण अपि श्रीरामं तोषितवती शबरी कस्य महर्षेः शिष्या?

१. मतङ्गमहर्षेः। २. वसिष्ठमहर्षेः। ३. भृगुमहर्षेः।

V रामलक्ष्मणौ दृष्ट्वा हनूमान् कया भाषया सम्भाषणम् आरब्धवान्?

१. प्राकृतभाषया। २. संस्कृतभाषया। ३. पैशाचीभाषया।

VI रामस्य सामर्थ्ये सुग्रीवस्य विश्वासः कदा जातः?

१. सप्तसालभञ्जनस्य दर्शनानन्तरम्।

२. रामेण कृतस्य राक्षसवधादिकस्य श्रवणानन्तरम्।

३. रामस्य आकारस्य दर्शनमात्रेण।

उत्तराणि –

I–२. II–३. III–२. IV–१. V–२. VI–१.

रसप्रश्नाः –

सीतान्वेषणप्रयत्नः

[सुग्रीवस्य आदेशानुसारं सर्वे वानराः सीतान्वेषणार्थम् एकैकां दिशम् अनुसृतवन्तः। सपरिवारः हनूमान् लङ्कायाः दिशि प्रस्थितवान्। एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।]

I सीतान्वेषणार्थं सहचरैः प्रस्थितः हनूमान् कां दिशम् अनुसृतवान्?

१. दक्षिणदिशम्। २. पूर्वदिशम्। ३. उत्तरदिशम्।

II विन्ध्यपर्वते ते एकां गुहां प्रविष्टवन्तः, यत्र च प्रविष्टाः बहिः आगन्तुं न शक्नुवन्ति। तस्याः गुहायाः नाम किम्? केन निर्मिता सा?

१. अजन्ता, मयेन। २. ऋक्षबिलम्, मयेन। ३. गुहेश्वरः, जक्कणाचार्येण।

III तां गुहां रक्षयन्त्याः वृद्धायाः नाम किम्?

१. प्रभावती। २. सूर्यप्रभा। ३. स्वयंप्रभा।

IV लङ्कायां सीता बन्धने अस्ति इति सुस्पष्टं कथयन् सम्पातिः कः?

१. जटायुषः अनुजः। २. जटायुषः पिता। ३. जटायुषः अग्रजः।

V सीतादेवी लङ्कायां बन्धने अस्ति इति कथनेन सम्पातेः कः लाभः जातः?

१. दग्धं पक्षद्वयं पुनः आगतम्।
२. तत्क्षणे एव सः मोक्षं प्राप्तवान्।
३. अपूर्वाः काश्चन शक्तीः प्राप्तवान्।

उत्तराणि –

I–१. II–२. III–३. IV–३. V–१.

रसप्रश्नाः –

लङ्कायां प्रवेशः परिभ्रमणं च

[समुद्रम् उल्लङ्घ्य आञ्जनेयः लङ्कां प्राप्तवान्। तत्र लङ्काधिदेवतां पराजित्य अन्तः प्रविष्टवान्। सर्वत्र सीतान्वेषणं कृतवान् च। एतं सन्दर्भम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।]

I कस्यां दिशि हनूमान् लङ्कां प्रविष्टवान्?

१. उत्तरदिशि। २. पश्चिमदिशि। ३. दक्षिणदिशि।

II लङ्कानगरी कस्य शापात् ग्रस्ता आसीत्?

१. ईश्वरस्य शापात् २. नन्दिकेश्वरस्य शापात्। ३. ब्रह्मणः शापात्।

III 'यावत् वानरः भवतीं न जेष्यति तावत् नाशभीतिः नास्ति' इति केन वरः दत्तः?

१. ब्रह्मणा। २. विष्णुना। ३. नन्दिकेश्वरेण।

IV लङ्कादेवतां पराजित्य दुर्गभित्तिम् अतिक्रम्य हनूमान् कं पादं प्रथमं स्थापितवान्?

१. युगपत् पादद्वयम् अपि। २. दक्षिणपादम्। ३. वामपादम्।

V हनूमान् लङ्कां कदा प्रविष्टवान्?

१. प्रातः सूर्योदयसमये। २. सायं सूर्यास्तसमये।

३. अन्धकारप्रसारानन्तरं रात्रौ।

VI सीतान्वेषणतत्परः हनूमान् विविधावस्थासु सुप्तानां स्त्रीणां दर्शनात् आगतायाः पापशङ्कायाः विषये कथं मनःसमाधानं प्राप्तवान्?

१. मानवेतरस्य मम एषः न अधर्मः इति।

२. एतत्सन्दर्भे धर्माधर्मविचारः एव अनुचितः इति।

३. दृष्टवतः अपि मम मनः निष्कल्मषम् एव अस्ति इति।

उत्तराणि –

I–१. II–२. III–१. IV–३. V–३. VI–३.

रसप्रश्नाः –

सीतादर्शनम्

[वाल्मीकिरामायणस्य आधारेण हनूमता कृतं सीतादर्शनम् अधिकृत्य केचन सूक्ष्माः प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तर जानन्तु।]

१) रावणः सीताम् अशोकवने किमर्थं स्थापितवान्?

२) हनूमान् अशोकवने किंजातीयक वृक्षम् आरुह्य उपविष्टवान्?

३) अंशोकवने सर्वप्रथमं सीतां दृष्ट्वा हनूमान् कथं सीतात्वेन तस्याः प्रत्यभिज्ञान प्राप्तवान्?

४) रावणेन सीतायै वर्षात्मकः अवधिः दत्तः आसीत्। यदा हनूमान् सीतां दृष्टवान् तदा कतिमासात्मकः अवधिः शिष्टः आसीत्?

५) विवाहविषये अनुरोधं कुर्वते रावणाय सीता कथम् उत्तरं दत्तवती?

६) 'सीतायाः इष्टसिद्धिः भविष्यति' इति स्वप्नस्य आधारेण उक्तवत्याः राक्षस्याः नाम किम्?

७) आत्महत्यां कर्तुं सङ्कल्पितवती सीता कया उद्वन्धनं कर्तुम् उद्युक्ता?

८) आत्महत्याप्रयत्नं सीता किमर्थं त्यक्तवती?

९) हनूमान् स्वदर्शनेन सीतायां जायमानस्य उद्वेगस्य निवारणार्थं किं कृतवान्?

१०) हनूमान् सीतायै कीदृशम् अङ्गुलीयकं दत्तवान्?

उत्तराणि–

(१) विशेषकारणं किमपि नास्ति। अपहृत्य आनीता सीता कुत्रापि स्थापनीया आसीत्। अशोकवने स्थापिता, तावदेव। (२) शिंशुपावृक्षम् आरुह्य। (३) सीतया धृतानि आभरणानि दृष्ट्वा, येषां च वर्णनं पूर्वं रामेण कृतम् आसीत्। (४) मासद्वयात्मकः अवधिः। (५) तृणं पुरतः संस्थाप्य। (६) त्रिजटा। (७) स्वकीयया वेण्या। (८) तत्समये जातानि शुभानि निमित्तानि दृष्ट्वा। (९) वृक्षे उपविश्य रामचरित्रं यथावत् गीतवान्। (१०) रामनामाङ्कितम्।

रसप्रश्नाः—

अभिज्ञानदानम्

(रामेण दत्तम् अङ्गुलीयकं हनूमान् सीतायै दत्तवान्। तत् प्राप्य सीता अन्यत् अभिज्ञानं दत्त्वा किञ्चित् कथाम् अपि श्रावितवती। तं कथाभागम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. 'सीता रामाय अर्पणीया' इति रावणम् उद्दिश्य उक्तं विभीषणवचनं सीतां का श्रावितवती?
(अ) त्रिजटा नाम राक्षसी। (आ) विभीषणपुत्री अनला। (इ) विभीषणस्य पत्नी।

II. हनूमति नेतुं सिद्धे सत्यपि सीता गमनं निराकृतवती। तत्र प्रधानं कारणं किम्?
(अ) हनूमान् नेतुं न शक्नोति इति। (आ) राक्षसाः विघ्नम् उत्पादयेयुः इति। (इ) तथा कृतं चेत् रामस्य अपमाननं भवेत् इति।

III. अभिज्ञानार्थं रामः सूचनीयः इति सीता वायसघटनां श्रावितवती। सा घटना कुत्र प्रवृत्ता आसीत्?
(अ) दण्डकारण्ये। (आ) जनस्थाने। (इ) चित्रकूटे।

IV. सीतायां मोहितः कः वायसरूपेण आगतः आसीत्?
(अ) इन्द्रस्य पुत्रः जयन्तः। (आ) मन्मथः। (इ) देवेन्द्रः।

V. वायसम् उद्दिश्य रामः कम् अस्त्रं प्रयुक्तवान्?
(अ) ब्रह्मास्त्रम्। (आ) ब्रह्मास्त्रमन्त्रेण अभिमन्त्रितां दर्भाम्। (इ) पाशुपतास्त्रम्।

VI. आत्मानं नेतुं सीता रामाय कियतः कालस्य अवधिं सूचितवती?
(अ) एकमासात्मकम्। (आ) मासद्वयात्मकम्। (इ) सार्धैकमासात्मकम्।

VII. 'रामाय दातव्यः' इति उक्त्वा हनूमते किं दत्तवती सीता?
(अ) कान्तिमणिम्। (आ) शिखामणिम्। (इ) चूडामणिम्।

उत्तराणि—

I- (आ) II- (इ) III (इ) IV- (अ) V- (आ) VI- (अ) VII- (इ)

रसप्रश्नाः–

हनूमत्पराक्रमः

(सीताहस्ततः अभिज्ञानार्थं चूडामणिं स्वीकृत्य निर्गतः हनूमान् अशोकवनं नाशितवान्। बद्धुम् आगतान् राक्षसान् सः लीलया यमपुरीं प्रेषितवान्। एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. हनूमान् अशोकवनं किमर्थं नाशितवान्?
(अ) कपिसहजेन चापल्येन। (आ) रावणं द्रष्टुम् इच्छन्। (इ) क्रोधवशात् युक्तायुक्तताम् अजानन्।

II. अशोकवनं नाशितवन्तं हनूमन्तं बद्धुं सर्वप्रथमं के आगतवन्तः?
(अ) प्रमुखाः सेनापतयः। (आ) रावणपुत्राः। (इ) किङ्करनामकाः राक्षसाः।

III. तान् राक्षसान् हनूमान् केन आयुधेन मारितवान्?
(अ) तोरणस्थेन परिघेण। (आ) समीपस्थेन सालवृक्षेण। (इ) दृढया मुष्ट्या।

IV. चैत्यप्रासादं नाशितवन्तं हनूमन्तं बद्धुम् आगतः हनूमता मारितः राक्षसः कः?
(अ) प्रहस्तपुत्रः जम्बुमाली। (आ) शतहस्तपुत्रः अंशुमाली। (इ) विहस्तपुत्रः वनमाली।

V. सप्त मन्त्रिकुमारान् पञ्च सेनानायकान् च मारितवन्तं हनूमन्तं बद्धुम् आगतस्य रावणपुत्रस्य नाम किम्?
(अ) इन्द्रजित्। (आ) मेघनादः। (इ) अक्षकुमारः।

VI. रावणपुत्रः हनूमन्तं केन अस्त्रेण बद्धवान्?
(अ) ब्रह्मास्त्रेण। (आ) नागास्त्रेण। (इ) पाशुपतास्त्रेण।

उत्तराणि–

I- (आ) II- (इ) III- (अ) IV- (अ) V- (इ) VI- (अ)

*

रसप्रश्नाः—

रामप्रयाणं, रावणमन्त्रणं च

(सागरोल्लङ्घनार्थं कृतनिश्चयं रामं हनूमान् लङ्कायाः स्वरूपं बोधयति। ततः कपिसेना किष्किन्धातः निर्गत्य सागरतीरं प्राप्नोति। लङ्कायां च रावणः द्विवारं मन्त्रालोचनसभाम् आयोजयति। तत्र राक्षसप्रमुखाणाम् अभिप्रायं सङ्गृह्णाति। वाल्मीकिरामायणस्य एतं कथाभागम् आश्रित्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

१. लङ्कायाः कति महाद्वाराणि सन्ति इति हनूमान् रामं वदति?
२. लङ्का कतिभिः दुर्गैः रक्ष्यमाणा अस्ति? तेषां दुर्गाणां नामानि कानि?
३. कस्मिन् मुहूर्ते रामः लङ्कां प्रति प्रयाणम् आरब्धवान्?
४. मार्गशोधनार्थं कः नियुक्तः आसीत्?
५. प्रयाणसमये हनूमतः स्कन्धे कः उपविष्टवान् आसीत्?
६. लक्ष्मणः कस्य स्कन्धम् अधिरूढवान् आसीत्?
७. 'अयोध्यायाम् अनर्थः घटितः, भरतेन प्रेषिताः वयम्। भवता प्रत्यागन्तव्यम् इति मानुषरूपेण गत्वा रामः वक्तव्यः' इति रावणं कः सूचितवान्?
८. सीतापहरणं युक्तम् इति उक्तं कुम्भकर्णेन, उत अयुक्तम् इति?
९. सीता बलात् वशीकरणीया इति केन सूचितम्?
१०. रावणेन पूर्वं का बलात्कृता आसीत्, येन 'अन्यदा बलात्कारे मरणम्' इति शापः तेन प्राप्तः?
११. स च शापः केन/कया दत्तः?

उत्तराणि—

१. चत्वारि। २. चतुर्भिः दुर्गैः। जलदुर्गं, गिरिदुर्गं, वनदुर्गं, कृत्रिमदुर्गं चेति। ३. अभिजिन्मुहूर्ते। ४. नलः। ५. सुग्रीवः, रामः च। ६. अङ्गदस्य। ७. वज्रदंष्ट्रः। ८. अयुक्तम् इति। ९. महापार्श्वेन। १०. पुञ्जिकस्थला नाम अप्सराः। ११. ब्रह्मदेवेन।

रसप्रश्नाः–

सेतुबन्धात् पूर्वम्

(रावणपक्षं परित्यज्य आगतः विभीषणः रामं शरणं गतवान्। पूर्वापरं विविच्य रामः विभीषणाय अभयं दत्तवान्। विभीषणः रामपक्षीयः जातः। अग्रे किं करणीयम् इति विषये समालोचनं जातम्। सेतुबन्धात् पूर्वं काश्चन घटनाः प्रवृत्ताः। ताः आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति – वाल्मीकिरामायणकथानुसारम्। युक्तम् उत्तरं जानन्तु।)

I. 'समुद्रतरणार्थं मार्गं सूचयतु' इति विभीषणं कः प्रार्थितवान्?

II. विभीषणः उत्तररूपेण किम् उक्तवान्?

III. 'समुद्रस्य अपरस्मिन् तीरे रामसेना आगत्य स्थिता अस्ति' इति रावणं कः सूचितवान्?

IV. 'रामस्य पक्षं परित्यज्य किष्किन्धां प्रतिगच्छतु' इत्येतं रावणसन्देशं सुग्रीवाय कः नीतवान्?

(अ) सः केन रूपेण गतवान्?

(आ) वानराः तं बद्ध्वा पुनः त्यक्त्वा पुनः किमर्थं बद्धवन्तः?

(इ) तस्य बन्धविमोचनं कदा जातम्?

V. सामोपायं तिरस्कृतवन्तं समुद्रम् अभिलक्ष्य क्रुद्धः रामः किम् अस्त्रं प्रयोक्तुम् उद्युक्तः?

(अ) रामः तत् अस्त्रं कुत्र प्रयुक्तवान्?

(आ) किमर्थं तत्र प्रयुक्तवान् सः?

(इ) अनन्तरकाले तस्य स्थलस्य किं नाम प्रसिद्धम् अभवत्?

उत्तराणि–

I – सुग्रीवः हनूमान् च।

II – समुद्रः शरणं प्रार्थनीयः इति। III – चारः शार्दूलः

IV – शुकः। (अ) शुकरूपेण। (आ) सः उपरि स्थित्वा रामबलं परिशीलयन् आसीत् इत्यतः। (इ) लङ्कातीरस्य प्राप्तेः अनन्तरम्। V – ब्राह्मम् अस्त्रम्। (अ) द्रुमकुल्यनामके स्थले। (आ) नीचैः दस्युभिः तत् आक्रान्तम् आसीत् इत्यतः। (इ) 'व्रणकूपः' इति।

रसप्रश्नाः—

हर्षोन्मादः

(सीतायाः अनुमतिं प्राप्य हनूमान् लङ्कातः प्रत्यागतवान्। प्रयाणसमये प्रवृत्तं समग्रम् अङ्गदादीन् उक्तवान् हनूमान्। ततः सुग्रीवदर्शनार्थं प्रस्थिताः ते मध्येमार्गं किञ्चन वनं दृष्टवन्तः। तत् प्रविश्य नाशितवन्तः। रामायणस्य एतां घटनाम् आधारीकृत्य अत्र केचन प्रश्नाः उपप्रश्नाः च सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. लङ्कातः प्रस्थातुम् उद्युक्तः हनूमान् कं गिरिम् आरूढवान्?
   (अ) हनूमतः प्रस्थानवेगात् हेतोः पर्वतस्य का गतिः जाता?
   (आ) हनूमान् ततः कां दिशम् अनुसृतवान्?

II. सीतावृत्तान्तम् अविलम्बेन निवेदयितुम् इच्छन्तः अङ्गदादयः हनूमान् च आकाशे गमनसमये एकं वनं दृष्टवन्तः। तस्य वनस्य नाम किम्?
   (अ) तत् वनं कस्य?
   (आ) तस्य वनस्य रक्षकः कः?
   (इ) वनरक्षकस्य वनस्वामिनः च सम्बन्धः कः?
   (ई) तस्मिन् वने किम् आसीत्?

III. वनरक्षकं कः उन्नीय अधः पातितवान्?

IV. वननाशं श्रुतवतः सुग्रीवस्य प्रतिक्रिया का?
   (अ) तथा प्रतिक्रिया किमर्थम्?
   (आ) प्रवेशानर्हम् अपि वनं हनूमदङ्गदादयः किमर्थं प्रविष्टवन्तः?
   (इ) कृतापराधान् तान् सुग्रीवः किमर्थं क्षान्तवान्?

उत्तराणि—

I. अरिष्टपर्वतम्। (अ) पर्वतः रसातलं गतः। (आ) उत्तरदिशम्।

II. मधुवनम्। (अ) सुग्रीवस्य। (आ) दधिमुखो नाम वानरः। (इ) दधिमुखः सुग्रीवस्य मातुलः। (ई) मदजनकं मधु आसीत्।

III. युवराजः अङ्गदः।

IV. वननाशं श्रुत्वा अपि सः नितरां सन्तुष्टः। (अ) हनूमदङ्गदादयः उपस्थिताः इति। (आ) 'कार्यं साधितम्' इति हर्षातिरेकेण। (इ) कृतकर्मणां चेष्टितं सोढव्यम् इति मत्वा।

रसप्रश्नाः—

हर्षोन्मादः

(सीतायाः अनुमतिं प्राप्य हनूमान् लङ्कातः प्रत्यागतवान्। प्रयाणसमये प्रवृत्तं समग्रम् अङ्गदादीन् उक्तवान् हनूमान्। ततः सुग्रीवदर्शनार्थं प्रस्थिताः ते मध्येमार्गं किञ्चन वनं दृष्टवन्तः। तत् प्रविश्य नाशितवन्तः। रामायणस्य एतां घटनाम् आधारीकृत्य अत्र केचन प्रश्नाः उपप्रश्नाः च सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. लङ्कातः प्रस्थातुम् उद्युक्तः हनूमान् कं गिरिम् आरूढवान्?
   (अ) हनूमतः प्रस्थानवेगात् हेतोः पर्वतस्य का गतिः जाता?
   (आ) हनूमान् ततः कां दिशम् अनुसृतवान्?

II. सीतावृत्तान्तम् अविलम्बेन निवेदयितुम् इच्छन्तः अङ्गदादयः हनूमान् च आकाशे गमनसमये एकं वनं दृष्टवन्तः। तस्य वनस्य नाम किम्?
   (अ) तत् वनं कस्य?
   (आ) तस्य वनस्य रक्षकः कः?
   (इ) वनरक्षकस्य वनस्वामिनः च सम्बन्धः कः?
   (ई) तस्मिन् वने किम् आसीत्?

III. वनरक्षकं कः उन्नीय अधः पातितवान्?

IV. वननाशं श्रुतवतः सुग्रीवस्य प्रतिक्रिया का?
   (अ) तथा प्रतिक्रिया किमर्थम्?
   (आ) प्रवेशानर्हम् अपि वनं हनूमदङ्गदादयः किमर्थं प्रविष्टवन्तः?
   (इ) कृतापराधान् तान् सुग्रीवः किमर्थं क्षान्तवान्?

उत्तराणि—

I. अरिष्टपर्वतम्। (अ) पर्वतः रसातलं गतः। (आ) उत्तरदिशम्।

II. मधुवनम्। (अ) सुग्रीवस्य। (आ) दधिमुखो नाम वानरः। (इ) दधिमुखः सुग्रीवस्य मातुलः। (ई) मदजनकं मधु आसीत्।

III. युवराजः अङ्गदः।

IV. वननाशं श्रुत्वा अपि सः नितरां सन्तुष्टः। (अ) हनूमदङ्गदादयः उपस्थिताः इति। (आ) 'कार्यं साधितम्' इति हर्षातिरेकेण। (इ) कृतकर्मणां चेष्टितं सोढव्यम् इति मत्वा।

रसप्रश्नाः—

सीतावृत्तान्तकथनम्

(सीतां दृष्ट्वा प्रत्यागतः हनूमान् वानरैः सह सुग्रीवसमीपं प्रस्थितवान्। मार्गमध्ये तैः वानरैः मधुवनं नाशितम्। हनूमान् रामं दृष्ट्वा सीतावृत्तान्तं विस्तरेण निवेदितवान्। वाल्मीकिरामायणस्य एतं कथाभागम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. सीतान्वेषणे सफलतां प्राप्य प्रत्यागच्छद्भिः हनूमदादिभिः रामलक्ष्मणादयः कुत्र दृष्टाः?

II. रामं दृष्ट्वा हनूमान् सर्वप्रथमं किम् उक्तवान्?

III. 'रामाय ददातु' इति उक्त्वा अभिज्ञानरूपेण चूडामणिं हनूमते दत्तवती सीता। तत्समये स च मणिः तया कुत्र धृतः आसीत्?

(अ) स च मणिः पूर्वं केन तस्यै दत्तः?

(आ) कदा च दत्तः?

(इ) तेन दात्रा स च मणिः कथं प्राप्तः आसीत्?

IV. 'मम पृष्ठम् आरोहतु, नयामि भवतीम्' इति उक्तवन्तं हनूमन्तं सीता किम् उक्तवती?

V. प्रियवार्तां निवेदितवते हनूमते कीदृशम् उपायनं दत्तवान् रामः?

उत्तराणि—

I. प्रस्रवणनामके पर्वते।

II. 'सीता नियमपरा कुशलिनी च अस्ति' इति।

III. न धृतः आसीत्, अपि तु वस्त्राञ्चले बद्धः आसीत्।

(अ) तस्याः पित्रा जनकराजेन।

(आ) विवाहसमये।

(इ) यज्ञे परमसन्तुष्टेन इन्द्रेण दत्तः आसीत्।

IV. 'स्वबुद्ध्या परपुरुषस्य भवतः पृष्ठस्य स्पर्शनम् अधर्माय' इति।

V. आलिङ्गनसुखरूपम् उपायनम्।

रसप्रश्नाः–

विभीषणशरणागतिः

('सीता रामाय अर्पणीया' इति रावणं बहुधा बोधितवान् विभीषणः। अन्ते रावणेन तिरस्कृतः सः रावणपक्षं परित्यज्य रामं शरणं गतवान्। रामः पूर्वापरम् आलोच्य सहकारिभिः समालोच्य विभीषणाय शरणं दत्तवान्। वाल्मीकिरामायणस्य एतं कथाभागम् आधारीकृत्य सज्जीकृताः केचन प्रश्नाः अधः सन्ति। उत्तररूपेण त्रयः विकल्पाः सूचिताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. श्रीरामं शरणं गन्तुम् इच्छन् विभीषणः कथम् आगतवान्?

(अ) एकाकी आगतवान्।

(आ) द्वाभ्यां राक्षसभटाभ्यां सह आगतवान्।

(इ) चतुर्भिः सचिवैः सह आगतवान्।

II. आकाशमार्गेण आगच्छन्तं विभीषणं सर्वप्रथमं कः दृष्टवान्?

(अ) सुग्रीवः। (आ) हनूमान्। (इ) अङ्गदः। (ई) जाम्बवान्।

III. विभीषणस्य आगमनं श्रुत्वा रामः कपिप्रमुखाणाम् अभिप्रायं पृष्टवान्। अभिप्रायम् अभिप्रायवक्त्रा सह योजयन्तु।

(अ) उपायेन परीक्षणीयः सः।	(अ) सुग्रीवः।
(आ) गूढचरद्वारा परोक्षपरीक्षा करणीया।	(आ) जाम्बवान्।
(इ) अदेशकाले आगते न विश्वसनीयम्।	(इ) मैन्द्रः।
(ई) प्रत्यक्षतः प्रश्नेन तस्य स्वभावः ज्ञातव्यः।	(ई) अङ्गदः।
(उ) शरणायोग्यः सः दण्डनीयः।	(उ) हनूमान्।
(ऊ) तस्य स्वीकारः एव उचितः।	(ऊ)शरभः।

IV. विभीषणाय अभयदानस्य अनन्तरं रामः किं कृतवान्?

(अ) विभीषणं विश्रान्त्यर्थं वसतिमण्डपं प्रति प्रेषितवान्।

(आ) विभीषणं सेनापतिस्थाने नियोजितवान्।

(इ) राक्षसराजस्थाने विभीषणस्य अभिषेकं कारितवान्।

उत्तराणि–

I–इ. II–अ. III–अ-ई, आ-ऊ, इ-आ, ई-इ, उ-अ, ऊ-उ.

IV–इ

रसप्रश्नाः–

युद्धारम्भात् पूर्वम् .....

(रामः सेतुं निर्माय समुद्रम् अतिक्रम्य लङ्कातीरं प्राप्तवान्। रावणः प्रासादशिखरम् आरुह्य शत्रुसेनां स्वयं परिशीलितवान्। सीतां वञ्चयितुं तेन प्रयत्नः कृतः। रामपक्षे रावणपक्षे च मन्त्रालोचनं प्रवृत्तम्। वाल्मीकिरामायणस्य एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। उत्तररूपेण विकल्पत्रयम् अस्ति। युक्तम् उत्तरं जानन्तु।)

I. मायामयं शिरः प्रदर्श्य सीतां भायितवान् रावणः। तत् मायामयं शिरः कः निर्मितवान्?
(१) द्विजिह्वः। (२) विद्युज्जिह्वः। (३) दीर्घजिह्वः।

II. सीतां भाययितुम् इच्छन् रावणः 'रामः केन मारितः' इति वदति?
(१) लम्बहस्तेन। (२) विहस्तेन। (३) प्रहस्तेन।

III. मायामयं शिरः दृष्ट्वा भ्रान्त्या दुःखम् अनुभवन्त्याः सीतायाः आश्वासनं का कृतवती?
(१) विभीषणपत्नी सरमा। (२) घोरराक्षसी सुरमा।
(३) प्रहस्तपत्नी सुरामा।

IV. रावणेन आयोजितायां सभायां स्थितः कः 'सन्धिः एव उचितः' इति रावणं बोधितवान्?
(१) मन्त्री महोदरः। (२) मातामहः माल्यवान्।
(३) सहोदरः कुम्भकर्णः।

V. इन्द्रजिदादयः पश्चिमादिद्वाररक्षणार्थं रावणेन नियोजिताः। रावणः स्वयं कस्य द्वारस्य रक्षणार्थं स्थितवान्?
(१) पूर्वद्वारस्य। (२) दक्षिणद्वारस्य। (३) उत्तरद्वारस्य।

VI. विभीषणः शत्रुबलस्य ज्ञानार्थं स्वसचिवान् अनल-शरभ-सम्पाति-प्रघसनामकान् लङ्कां प्रेषितवान्। ते केन रूपेण गत्वा प्रत्यागतवन्तः।
(१) पक्षिरूपेण। (२) राक्षसरूपेण। (३) अदृश्यरूपेण।

उत्तराणि–

I.-१. II.-३. III-१. IV-२. V-३. VI-१.

रसप्रश्नाः—

सेतुः सिद्धा, ततः .....

(समुद्रतीरं प्राप्तः रामः सामोपायेन समुद्रं प्रार्थितवान्। किन्तु समुद्रः औदासीन्यं प्रकटितवान्। तदा क्रुद्धः रामः धनुषि बाणं योजितवान्। एतस्मात् भीतः समुद्रः प्रत्यक्षीभूय सेतुनिर्माणक्रमं सूचितवान्। सेतुनिर्माणं सम्पन्नम्। रामसेना लङ्कातीरं गता। रामसेनायाः सामर्थ्यं ज्ञातुं रावणः विविधान् प्रयत्नान् कृतवान्। वाल्मीकिरामायणस्य एतस्य कथाभागस्य आधारेण अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

१. सेतुः अमुकपुरुषेण एव निर्मातव्या इति कः सूचितवान्?
२. सेतुः केन वानरवीरेण निर्मिता?
३. सः कस्य पुत्रः?
४. सेतोः विस्तारः दैर्घ्यं च कियत् आसीत्?
५. सेतुनिर्माणार्थं कति दिनानि आवश्यकानि अभवन्?
६. अपायनिवारणार्थं सेतोः दक्षिणतः कः स्थितवान्?
७. समुद्रम् उल्लङ्घ्य आगता रावणसेना कुत्र स्थिता?
८. रामसेनायाः बलं ज्ञातुं रावणः कौ प्रेषितवान्?
९. तौ केन वेषेण रामसेनां प्रविष्टवन्तौ?
१०. वेषान्तरेण सञ्चरन्तौ तौ कः गृहीतवान्?
११. कृतापराधिनौ अपि तौ किमर्थं बन्धविमुक्तौ कृतवान् रामः?
१२. ताभ्यां शत्रुबलनिर्णयं कर्तुं न शक्तम् इति ज्ञात्वा रावणः किं कृतवान्?
१३. शत्रुबलं ज्ञातुम् इच्छन् रावणः पुनरपि गुप्तचरान् प्रेषितवान्। तेषां गुप्तचराणां नायकः कः?

उत्तराणि—

१. समुद्रः। २. नलेन। ३. विश्वकर्मणः। ४. दशयोजनविस्तीर्णा, शतयोजनदीर्घा च। ५. पञ्च दिनानि। ६. विभीषणः। ७. सुवेलपर्वतस्य समीपे। ८. अमात्यौ शुकसारणौ। ९. कपिवेषेण। १०. बिभीषणः। ११. दूतः न वध्यः इत्यतः। १२. स्वयं सौधम् आरुह्य सेनाबलं दूरात् दृष्टवान्। १३. शार्दूलः।

रसप्रश्नाः—

अनुवर्तते युद्धम्

(इन्द्रजिता प्रयुक्तेन सर्पास्त्रेण रामलक्ष्मणौ बद्धौ जातौ। तदा वानरपक्षे सर्वथा निराशा प्रसृता। रावणपक्षे च विजयोत्साहः। विजयोन्मत्तः रावणः सीतां पुष्पकविमानेन प्रेषयित्वा मूर्च्छितौ रामलक्ष्मणौ प्रदर्शितवान्। रामलक्ष्मणयोः पुनश्चेतनानन्तरं युद्धम् अनुवृत्तम्। वाल्मीकिरामायणस्य एतं कथाभागम् आश्रित्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I सर्पास्त्रकारणतः मूर्च्छां गतौ रामलक्ष्मणौ प्रदर्शयितुं रावणः सीतां पुष्पकविमानेन प्रेषितवान्। तदा सीतया सह का गतवती?
(अ) लम्बकर्णा। (आ) त्रिजटा। (इ) विकेशा।

II रामलक्ष्मणयोः सर्पास्त्रं कथम् अपगतम् अभवत्?
(अ) हनूमता आनीतस्य औषधमूलस्य प्रभावतः।
(आ) तौ स्वयं सचेतनौ जातौ।
(इ) गरुडः आगत्य तयोः बन्धनम् अपनीतवान्।

III रामलक्ष्मणौ अपायात् मुक्तौ दृष्ट्वा वानराः सर्वे सन्तुष्टाः। एतत् दृष्ट्वा कः राक्षसनायकः युद्धार्थम् आगतवान्?
(अ) इन्द्रजित्। (आ) धूम्राक्षः। (इ) प्रहस्तः।

IV एवम् आगतं राक्षसराजं कः केन मारितवान्?
(अ) हनूमान् पर्वतशिखरपातनेन।
(आ) अङ्गदः गदाप्रहारेण।
(इ) श्रीरामः बाणप्रयोगेन।

उत्तराणि—

I-(आ). II-(इ). III-(आ). IV-(अ).

रसप्रश्नाः–

रणरङ्गम् आगतः रावणः

(रावणपक्षस्य प्रमुखाः अपि यदा हताः तदा रावणः महता दर्पेण रणरङ्गं प्रविष्टवान्। किन्तु रामबाणैः तीव्रं व्रणितः अभवत् सः। तस्य किरीटं पतितम्। तस्य सारथिः मृतः। एवं तस्मिन् दिने पराजयं प्राप्य प्रतिगतवान् रावणः। अनन्तरकालीनां घटनाम् आधारीकृत्य वाल्मीकिरामायणानुसारं केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. रावणः पूर्वं विभिन्नेषु सन्दर्भेषु कैश्चित् शप्तः आसीत्। अधः शापदातॄणां नामभिः सह शापदानेन असम्बद्धम् अपि एकं नाम अस्ति। तत् नाम किम्?
(अ) पार्वती। (आ) नन्दिकेश्वरः। (इ) इन्द्रः। (ई) रम्भा।

II. 'देवैः न, अपि तु सामान्येन मानवेन रामेण आक्रमणं कृतम्' इति कुम्भकर्णं कः निवेदितवान्?
(अ) कश्चन भटः। (आ) यूपाक्षः नाम राजसचिवः। (इ) प्रहस्तः नाम मन्त्री।

III. कुम्भकर्णस्य पितुः नाम किम्?
(अ) विश्वावसुः। (आ) विश्रावणः। (इ) विश्रवाः।

IV. 'षण्मासान् यावत् निद्रां प्राप्नोतु। एकं दिनं जागरितः तिष्ठतु' इति कुम्भकर्णं कः शप्तवान्?
(अ) ब्रह्मा। (आ) इन्द्रः। (इ) कुबेरः।

V. लङ्कायां स्थितस्य कुम्भकर्णस्य दर्शनात् भीतां वानरसेनां शान्तां कर्तुं रामेण किं कृतम्?
(अ) सः शक्तिहीनः स्थूलकायः इति वानरान् बोधितवान्।
(आ) सः न मानवः, अपि तु यन्त्रम् इति वानरान् बोधितवान्।
(इ) 'मयि स्थिते भीतिः किमर्थम्?' इति वानरान् बोधितवान्।

उत्तराणि–

I.–(इ). II.–(आ). III.–(इ). IV.–(अ). V.–(आ).

रसप्रश्नाः–

रामलक्ष्मणयोः मूर्च्छा

(रामपक्ष-रावणपक्षयोः युद्धम् आरब्धम्। पक्षद्वये अपि महान् युद्धोत्साहः। इन्द्रजित् रणरङ्गं प्रविष्टवान्। किन्तु तेन पराजयः प्राप्तः। एतेन क्रुद्धः सः अन्तर्हितः सन् सर्पास्त्रप्रयोगेण रामलक्ष्मणौ मूर्च्छितौ कृतवान्। एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। उत्तररूपेण विकल्पत्रयं सूचितम् चापि। युक्तम् उत्तरं जानन्तु।)

१. क्रुद्धः इन्द्रजित् अन्तर्हितः सन् सर्पास्त्रेण रामलक्ष्मणौ बद्धवान्। तस्य क्रोधस्य कारणं किम्?
(अ) सः अङ्गदेन पराजितः आसीत् इत्यतः।
(आ) सः रामेण पराजितः आसीत् इत्यतः।
(इ) सः हनूमता पराजितः आसीत् इत्यतः।

२. अन्तर्धानं प्राप्तुं सामर्थ्यं तेन कस्य अनुग्रहात् प्राप्तम् आसीत्?
(अ) शिवस्य। (आ) विष्णोः। (इ) ब्रह्मणः।

३. रामलक्ष्मणौ मूर्च्छां गतवन्तौ आस्तां खलु? तयोः कतरः प्रथमं सचेतनः जातः?
(अ) रामः। (आ) लक्ष्मणः। (इ) उभौ अपि युगपत् एव।

४. औषधमूलानि आनीतानि चेत् सर्पास्त्रबन्धनम् अपनेतुं शक्येत इति कः सूचितवान्?
(अ) सुग्रीवः। (आ) सुषेणः। (इ) जाम्बवान्।

5. सर्पास्त्रबन्धनं कः अपनीतवान्?
(अ) गरुडः। (आ) इन्द्रः। (इ) सञ्जीविनीसस्यम्।

उत्तराणि–

I-(अ). II-(इ). III-(अ). IV-(आ). V-(अ).

रसप्रश्नाः–

रणरङ्गम् आगतः रावणः

(सेतुं निर्माय समुद्रम् अतिक्रम्य आगतया कपिसेनया युद्धम् आरब्धम्। युद्धे रावणपक्षीयाः प्रमुखाः बहवः मृताः। अन्ते रावणः एव स्वयं रणरङ्गम् आगतवान्। रावणेन सह लक्ष्मणः रामश्च युद्धं कृतवन्तौ। वाल्मीकिरामायणस्य एतं कथाभागम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. रणरङ्गे तीव्रं व्रणितः रावणः केन अस्त्रेण लक्ष्मणं मूर्च्छितं कृतवान्?
(अ) शक्त्यायुधेन। (आ) आग्नेयास्त्रेण। (इ) वारुणास्त्रेण।

II. लक्ष्मणस्य मूर्च्छाप्राप्तेः समनन्तरं रावणेन किं कृतम्?
(अ) ततः हनूमता सह युद्धार्थं निर्गतवान्।
(आ) लक्ष्मणम् उन्नीय नेतुं प्रयत्नं कृतवान्।
(इ) सन्तोषेण तस्य दिनस्य युद्धं परिसमाप्य प्रासादं प्रतिगतवान्।

III. रणरङ्गम् आगतः रामः स्वसामर्थ्यं कथं प्रमाणीकृतवान्?
(अ) रावणं मूर्च्छां गमयन्।
(आ) रावणस्य किरीटं पातयन्।
(इ) रावणस्य रथं भञ्जयन्।

IV. 'इक्ष्वाकुवंशीयेन केनचित् मानवेन भवतः मारणं क्रियते' इति पूर्वं रावणं कः सूचितवान् आसीत्?
(अ) राजा अनरण्यः। (आ) देवराजः इन्द्रः। (इ) राजा दिलीपः।

V. 'आगामिजन्मनि अहम् एव भवतः मरणस्य कारणं भविष्यामि' इति का रावणं पूर्वम् आक्रोशेन उक्तवती आसीत्?
(अ) वेदवती। (आ) इन्द्राणी। (इ) पार्वती।

उत्तराणि–

I.–(अ). II.–(आ). III.–(आ). IV.–(अ). V.–(अ).

रसप्रश्नाः–

रणरङ्गे रावणप्रवेशः

(रामः लङ्कातीरं प्राप्य युद्धम् आरब्धवान्। युद्धे रामलक्ष्मणौ मूर्च्छितौ जातौ। गरुडस्य अनुग्रहेण तौ पुनः उत्थितवन्तौ। रावणः धूम्राक्षं युद्धार्थं प्रेषितवान्। धूम्राक्षः हनूमता हतः अभवत्। अनन्तरं रावणपक्षे केचन प्रमुखाः अपि हताः। ततः रावणः एव रणरङ्गम् आगतवान्। वाल्मीकिरामायणस्य एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. रावणपक्षीयाः केचन प्रमुखाः रामपक्षीयैः हताः अभवन्। 'अ' भागे हन्तॄणां नामानि, 'ब' विभागे च हतानां नामानि सन्ति। हन्तृहतयोः नाम योग्येन क्रमेण योजयन्तु।

'अ'	'ब'
(अ) आञ्जनेयेन	(अ) प्रहस्तः
(आ) द्विविदेन	(आ) समुन्नतः
(इ) अङ्गदेन	(इ) महानादः
(ई) दुर्मुखेण	(ई) वज्रदंष्ट्रः
(उ) जाम्बवता	(उ) अकम्पनः
(ऊ) तारेण	(ऊ) कुम्भहनुः
(ऋ) नीलेन	(ऋ) नरान्तकः

II. रणरङ्गम् आगतं रावणं सम्मुखीकर्तुं यावत् लक्ष्मणः प्रस्थितः ततः पूर्वम् एव रावणं कः मुष्ट्या प्रहृतवान्?

(अ) आञ्जनेयः। (आ) अङ्गदः। (इ) नीलः।

III. कः वानरवीरः रावणस्य ध्वजाग्रे, धनुषः अग्रे, किरीटाग्रे च तिष्ठन् रावणस्य कोपं वर्धितवान्?

(अ) आञ्जनेयः। (आ) अङ्गदः। (इ) नीलः।

IV. रावणः केन अस्त्रेण तं वानरवीरं मूर्च्छितं कृतवान्?

(अ) आग्नेयास्त्रेण। (आ) सर्पास्त्रेण। (इ) शक्त्यायुधेन।

उत्तराणि–

I.– अ-उ, आ-ऋ, इ-ई, ई-आ, उ-इ, ऊ-ऊ, ऋ-अ II.–(अ). III.–(इ). IV.–(अ).

रसप्रश्नाः—

राक्षसवीराणां वधः

(प्रतिदिनम् अपि युद्धे पराजयम् एव अनुभवन् रावणः महता प्रयासेन कुम्भकर्णम् उत्थाप्य रणरङ्गं प्रेषितवान्। किन्तु कुम्भकर्णः अपि हतः अभवत्। कुम्भकर्णस्य मरणं श्रुत्वा रावणः शोकतप्तः जातः। तदनन्तरघटनाः आधारीकृत्य वाल्मीकिरामयणस्य आधारेण अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तानि उत्तराणि जानन्तु।)

I. कुम्भकर्णवधात् दुःखतप्तं रावणं सान्त्वयित्वा कः रणरङ्गं प्रति प्रस्थितवान्?

(अ) प्रहस्तः। (आ) द्विजिह्वः। (इ) त्रिशिराः।

II. युद्धं प्रति प्रस्थितवन्तं तं देवान्तकः, नरान्तकः, अतिकायश्च अनुसृतवन्तः। एते के?

(अ) सेनानायकाः। (आ) रावणस्य सहोदराः। (इ) रावणस्य पुत्राः।

III. एवं प्रस्थितवतां वीराणां साहाय्यार्थं महोदर-महापार्श्वनामकौ प्रेषितवान् रावणः। एतौ कौ?

(अ) रावणपुत्रौ। (आ) रावणानुजौ। (इ) राक्षसवृद्धौ।

IV. कुम्भकर्णवधानन्तरं रामसेनां सम्मुखीकर्तुं गताः प्रमुखाः वीराः हताः अभवन्। अधः हन्तॄणां, हतानां, हननसाधनानां च नामानि निर्दिष्टानि सन्ति। एतानि योग्येन क्रमेण योजयन्तु।

हताः	हन्तारः	आयुधानि
(i) महोदरः	(अ) हनूमान्	(अ) मुष्टिः
(ii) नरान्तकः	(आ) हनूमान्	(आ) मुष्टिः
(iii) त्रिशिराः	(इ) अङ्गदः	(इ) पर्वतः
(iv) महापार्श्वः	(ई) नीलः	(ई) खड्गः
(v) अतिकायः	(उ) ऋषभः	(उ) गदा
(vi) देवान्तकः	(ऊ) लक्ष्मणः	(ऊ) ब्रह्मास्त्रम्

उत्तराणि—

I. – (इ). II. – (इ). III. – (आ). IV. – i)-(ई)(इ). ii)-(इ)(अ). iii)-(अ)(ई). iv)-(ऊ)(उ). v)-(ऊ)(ऊ). vi)-(आ)(आ).

रसप्रश्नाः–

रणरङ्गे विराजते कुम्भकर्णः

(प्रतिदिनम् अपि पराजयम् एव अनुभवन् खिन्नः रावणः महता प्रयत्नेन कुम्भकर्णम् उत्थापितवान्। रावणस्य अनुज्ञां प्राप्य कुम्भकर्णः गर्वेण रणरङ्गं प्रविष्टवान्। रणरङ्गे तेन बहुधा प्रतापातिशयाः प्रदर्शिताः। वाल्मीकिरामायणस्थाम् एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तानि उत्तराणि जानन्तु।)

I. निद्रातः उत्थाय आगतः कुम्भकर्णः रावणसमीपं गत्वा किं कृतवान्?
(अ) युद्धार्थम् अनुज्ञां प्रार्थितवान्।
(आ) सीतां रामाय अर्पयतु इति बोधितवान्।
(इ) अहं पुनरपि निद्राम् एव इच्छामि इति उक्तवान्।

II. कुम्भकर्णस्य चिन्तनरीतिः अयुक्ता इति कः उक्तवान्?
(अ) प्रहस्तः। (आ) रावणः। (इ) महोदरः।

III. 'युद्धं मास्तु, कपटोपायेन सीता वञ्चनीया वशीकरणीया च' इति रावणं कः बोधितवान्?
(अ) महोदरः। (आ) द्विजिह्वः। (इ) अकम्पनः।

IV. रणरङ्गम् आगतं कुम्भकर्णं दृष्ट्वा धावत्सु वानरेषु कः वानरवीरः धैर्यं पूरितवान्?
(अ) सुग्रीवः। (आ) अङ्गदः। (इ) हनूमान्।

V. कुम्भकर्णः मूर्च्छितं कम् उन्नीय लङ्कां प्रति गतवान्?
(अ) हनूमन्तम्। (आ) अङ्गदम्। (इ) सुग्रीवम्।

उत्तराणि–

I – (आ). II – (इ). III – (अ). IV – (आ). V – (इ).

रसप्रश्नाः—

कुम्भकर्णवधः

(युद्धे रावणस्य पक्षे बहवः शूराः दिवङ्गताः। अन्ते रावणः महता प्रयत्नेन स्वस्य अनुजं कुम्भकर्णं जागरितवान्। कुम्भकर्णः रावणं हितं बोधयित्वा रणरङ्गम् आगतवान्। प्रथमे दिने कुम्भकर्णस्य पराक्रमः विशेषतः अशोभत। एतदनन्तरीयां वाल्मीकिरामयणीयां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. वानरवीरान् खादन्तम् आगच्छन्तं कुम्भकर्णं लक्ष्मणः बाणैः तीव्रं व्रणितं कृतवान्। तदा कुम्भकर्णस्य का प्रतिक्रिया आसीत्?
(अ) कुपितः सन् गदया लक्ष्मणं प्रहृतवान्।
(आ) 'मम पुरतः धैर्येण स्थितः भवान् वीरः' इति उक्तवान्।
(इ) युद्धं कर्तुम् अशक्तः सन् दुर्गं प्रति गतवान्।

II. रामाभिमुखं गच्छतः कुम्भकर्णस्य अभिमुखं विभीषणः आगतवान्। तदा कुम्भकर्णः किं कृतवान्?
(अ) 'विश्वासघातक!, अपसरतु' इति विभीषणम् उक्तवान्।
(आ) 'दण्डयिष्यामि भवन्तम्' इति उक्त्वा बाणैः प्रहृतवान्।
(इ) 'रामम् आश्रयता भवता युक्तं कृतम्' इति उक्तवान्।

III. मुद्गरायुधसहितं कुम्भकर्णहस्तं रामः केन अस्त्रेण कर्तितवान्?
(अ) ऐन्द्रास्त्रेण। (आ) आग्नेयास्त्रेण। (इ) वायव्यास्त्रेण।

IV. कुम्भकर्णस्य पादौ काभ्याम् अस्त्राभ्यां कर्तितवान् रामः?
(अ) पाशुपतास्त्राभ्याम्। (आ) ऐन्द्रास्त्राभ्याम्। (इ) अर्धचन्द्रास्त्राभ्याम्।

V. हस्तपादविहीनः अपि सर्पणेन अग्रे आगच्छन्तं कुम्भकर्णं केन अस्त्रेण मारितवान् रामः?
(अ) ऐन्द्रास्त्रेण। (आ) अर्धचन्द्रास्त्रेण। (इ) पाशुपतास्त्रेण।

उत्तराणि—

I – (आ). II – (इ). III – (इ). IV – (इ). V – (अ).

रसप्रश्नाः–

कुम्भनिकुम्भादिवधः

(कुम्भकर्णस्य वधस्य अनन्तरं बहूनां सेनानायकानां रावणपुत्रभ्रातॄणां च वधः जातः। एतत्सर्वं श्रुत्वा यदा रावणः खेदेन उपविष्टवान् तदा इन्द्रजित् रणरङ्गं प्रविष्टवान्। एतदनन्तरकालीनाः घटनाः आधारीकृत्य वाल्मीकिरामायणकथाम् आश्रित्य अधः केंचन प्रश्नाः सज्जीकृताः सन्ति। युक्तानि उत्तराणि जानन्तु।)

I. रणरङ्गम् आगतः इन्द्रजित् मायया युद्धं कुर्वन् केन अस्त्रेण वानरप्रमुखान् रामलक्ष्मणौ च मूर्च्छितान् कृतवान्?
(अ) आग्नेयास्त्रेण। (आ) ब्रह्मास्त्रेण। (इ) ऐन्द्रास्त्रेण।

II. हनूमता आनीतानाम् ओषधिसस्यानां गन्धस्य आघ्राणेन मृताः वानराः सर्वे उज्जीविताः। किन्तु राक्षसपक्षे कोऽपि न उज्जीवितः। किमर्थम्?
(अ) ओषधिसस्यानां गन्धः तावद्दूरं न प्रसृतः।
(आ) मृतानां देहं राक्षसाः खादितवन्तः आसन् इत्यतः।
(इ) मृतानां देहाः समुद्रे पातिताः आसन् इत्यतः।

III. वानरवीरैः स्वयम् अग्रे गत्वा लङ्कानगरी आक्रान्ता। तदा यूपाक्ष-प्रजङ्घादिभिः सह युद्धार्थम् अग्रे आगतः कुम्भः कस्य पुत्रः?
(अ) रावणस्य। (आ) कुम्भकर्णस्य। (इ) खरस्य।

IV. एषः महावीरः कुम्भः केन हतः?
(अ) सुग्रीवेण। (आ) अङ्गदेन। (इ) हनूमता।

V. रणरङ्गम् आगतः कुम्भस्य सहोदरः निकुम्भः केन हतः?
(अ) सुग्रीवेण। (आ) हनूमता। (इ) लक्ष्मणेन।

उत्तराणि–

I. – (आ). II. – (इ). III. – (आ). IV. – (अ). V. – (आ).

रसप्रश्नाः –

रावणसंहारानन्तरम्

(सेतुं निर्माय कपिसेना लङ्कासमीपम् आगता। युद्धम् आरब्धम्। वीराधिवीराः हताः अभवन्। अन्ते रामरावणयोः घोरं युद्धं प्रवृत्तम्। रामः ब्रह्मास्त्रेण रावणं हतवान्। रावणस्य हननस्य अनन्तरं याः घटनाः प्रवृत्ताः ताः आधारीकृत्य वाल्मीकिरामयणकथानुसारम् अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. 'मरणान्तानि वैराणि' इत्येतत् प्रसिद्धं वाक्यं कः कम् उद्दिश्य उक्तवान्?

(अ) लक्ष्मणः रामम् उद्दिश्य।

(आ) विभीषणः रामम् उद्दिश्य।

(इ) रामः विभीषणम् उद्दिश्य।

II. रावणस्य उत्तरसंस्कारः केन कृतः?

(अ) केनापि न कृतः। (आ) विभीषणेन कृतः।

(इ) रावणपुत्रेण बन्धुना वा केनचित्।

III. जयप्राप्त्यनन्तरं विभीषणस्य पट्टाभिषेकं निर्वर्त्य रामः सीतायाः समीपं कं प्रेषितवान्?

(अ) अनुजं लक्ष्मणम्। (आ) प्रियसखं हनूमन्तम्।

(इ) स्वयम् एव गतवान्।

IV. 'न कश्चित् न अपराध्यति' (सर्वे अपराधं कुर्वन्ति एव) इति प्रसिद्धं वचनं केन कम् उद्दिश्य उक्तम्?

(अ) रामेण विभीषणम् उद्दिश्य।

(आ) सुग्रीवेण लक्ष्मणम् उद्दिश्य।

(इ) सीतया हनूमन्तम् उद्दिश्य।

V. जयं प्राप्तवन्तं रामं दृष्टवत्याः सीतायाः प्रथमप्रतिक्रिया का आसीत्?

(अ) रुदती 'आर्यपुत्र!' इत्येतावत् उक्तवती।

(आ) सन्तोषेण भक्त्या च रामं नमस्कृतवती।

(इ) कोपकारणतः मौनम् आश्रितवती।

उत्तराणि–

I. – (इ). II. – (आ). III. – (आ). IV. – (इ). V. – (अ).

रसप्रश्नाः—

रणरङ्गे रावणः

(रणरङ्गे राक्षसवीराः सेनानायकाः च बहवः हताः। रावणपुत्राः अपि हताः। ततः रावणस्य प्रियपुत्रः इन्द्रजित् रणरङ्गं गतवान्। सोऽपि हतः अभवत्। तदा असहायः रावणः एव रणरङ्गं गन्तुम् उद्युक्तः। एतदनन्तरकालीनां घटनाम् आधारीकृत्य वाल्मीकिरामायणकथानुसारम् अधः केचन प्रश्नाः सज्जीकृताः। युक्तानि उत्तराणि जानन्तु।)

I. पुत्रस्य इन्द्रजितः वधं श्रुत्वा शोकान्धः रावणः सीताम् एव हन्तुम् उद्युक्तः। तदा कः तं तस्मात् प्रयत्नात् निवारितवान्?

(अ) सुपार्श्वः नाम मन्त्री। (आ) पारिपार्श्वः नाम सेनाधिपतिः।

(इ) रावणपत्नी मन्दोदरी।

II. पुत्रवधं श्रुत्वा शोकार्तः रावणः बलाध्यक्षेषु उत्साहं सम्पूर्य तान् युद्धार्थं प्रेषितवान्। तदा रामः केन अस्त्रेण शत्रून् नाशितवान्?

(अ) पाशुपतास्त्रेण। (आ) गान्धर्वास्त्रेण। (इ) किन्नरास्त्रेण।

III. सेनानायकाः अपि यदा हताः अभवन् तदा रावणः स्वयं युद्धार्थम् उद्युक्तः। क्रुद्धः सः केन अस्त्रेण किं कृतवान्?

(अ) तामसास्त्रेण कपीन् दग्धवान्। (आ) वारुणास्त्रेण कपीन् बद्धवान्। (इ) रौद्रास्त्रेण कपीन् मूर्च्छितान् कृतवान्।

IV. रावणः केन अस्त्रेण लक्ष्मणं मूर्च्छितं कृतवान्?

(अ) दिव्येन ब्रह्मास्त्रेण। (आ) सामान्येन अस्त्रेण।

(इ) शक्तिनामकेन आयुधेन।

V. मूर्च्छां गतस्य लक्ष्मणस्य चिकित्सा केन कृता?

(अ) जाम्बवता। (आ) विषेणेन। (इ) सुषेणेन।

VI. हनूमता सञ्जीवन्यादयः ओषधयः यतः आनीताः तस्य पर्वतस्य नाम किम्?

(अ) सञ्जीवनीपर्वतः इति। (आ) ओषधिपर्वतः इति।

(इ) हिमवत्पर्वतः इति।

उत्तराणि—

I. – (अ). II. – (आ). III. – (अ). IV. – (इ). V. – (इ). VI. – (आ).

रसप्रश्नाः–

इन्द्रजिद्वधः

(यथा यथा दिनानि गतानि तथा तथा रावणः क्षीणशक्तिः जातः। तथापि तेन विवेकस्तु न प्राप्तः। राक्षसवीराः बहवः मृताः। कुम्भः निकुम्भश्चापि मृतौ। ततः रावणस्य अन्तिमावलम्बनम् इन्द्रजित् रणरङ्गम् आगतः। वाल्मीकिरामायणस्य एतां घटनाम् आधारीकृत्य अधः केचन प्रश्नाः सज्जीकृताः। युक्तानि उत्तराणि जानन्तु।)

I. निकुम्भस्य वधस्य अनन्तरं रणरङ्गम् आगतः मकराक्षः कस्य पुत्रः?
(अ) विश्वामित्रयागसन्दर्भे रामेण निवारितस्य दूषणस्य पुत्रः।
(आ) विश्वामित्रयागसन्दर्भे रामेण निवारितस्य खरस्य पुत्रः।
(इ) सीताम् अपहर्तुम् आगतायाः ताटक्याः पुत्रः।

II. स च मकराक्षः केन वीरेण केन अस्त्रेण हतः?
(अ) लक्ष्मणेन, ऐन्द्रास्त्रेण।
(आ) अङ्गदेन, वारुणास्त्रेण।
(इ) रामेण, आग्नेयास्त्रेण।

III. रणरङ्गम् आगतः इन्द्रजित् अल्पं विजयं प्राप्य रामपक्षीयान् व्यामोहयितुं मायया सीतां सृष्ट्वा तस्याः शरीरं विदारितवान्। तत् तेन कुत्र कृतम्?
(अ) रामस्य सम्मुखे। (आ) सर्वेषु पश्यत्सु रणमध्ये। (इ) हनूमतः पुरतः।

IV. मायासीतां हत्वा पुनरपि अस्त्राणि प्राप्तुम् इन्द्रजित् कं/कां पूजितवान्?
(अ) इन्द्रम्। (आ) लङ्काधिदेवताम्। (इ) निकुम्भिलाम्।

V. घोरयुद्धस्य अनन्तरं लक्ष्मणः इन्द्रजितं हतवान्। तच्च केन अस्त्रेण?
(अ) ऐन्द्रास्त्रेण। (आ) ब्रह्मास्त्रेण। (इ) पाशुपतास्त्रेण।

VI. इन्द्रजितं संहृत्य प्रत्यागतस्य लक्ष्मणस्य शरीरे जातानां व्रणादीनां चिकित्सां कः कृतवान्?
(अ) सुषेणः। (आ) जाम्बवान्। (इ) अश्विनीदेवते।

उत्तराणि–

I. – (आ). II. – (इ). III. – (इ). IV. – (इ). V. – (अ). VI. – (अ).

रसप्रश्नाः—

श्रीरामपट्टाभिषेकः

(रावणस्य हननस्य अनन्तरं श्रीरामः सीतां स्वसमीपम् आनायितवान्। 'भवती यथेष्टं यत्रकुत्रापि गच्छतु' इति रामेण यदा उक्तं तदा सीता वज्रेण आहता इव अभवत्। आत्मनः पावित्र्यं प्रमाणीकर्तुं सा अग्निप्रवेशं कृतवती। एतदनन्तरकालीनाः घटनाः आधारीकृत्य वाल्मीकिरामयणकथानुसारम् अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. सीतायाः अग्निप्रवेशानन्तरं देवादयः तत्र प्रत्यक्षाः जाताः। देवेषु अन्यतमः श्रीरामं बोधितवान्— 'भवान् मानवमात्रं न, अपि ब्रह्मवस्तु भवान्' इति। एवं बोधयिता कः?

(अ) ब्रह्मा। (आ) इन्द्रः। (इ) महेश्वरः।

II. यदा इन्द्रलोकात् आगतः दशरथः अनुग्रहं कर्तुम् इष्टवान् तदा रामः कं वरं प्रार्थितवान्?

(अ) मृताः सर्वे वानराः उज्जीविताः भवन्तु इति।

(आ) भरतं कैकेयीं च शापः न स्पृशेत् इति।

(इ) कोऽपि वरः न प्रार्थितः, आशीर्वादमात्रं प्रार्थितम्।

III. अयोध्यां प्रति प्रस्थितः सपरिवारः श्रीरामः भरतदर्शनात् पूर्वं कुत्र वास कृतवान्?

(अ) भरद्वाजमुनेः आश्रमे। (आ) विश्वामित्रमुनेः आश्रमे।

(इ) गुहस्य प्रासादे।

IV. पट्टाभिषिक्तः श्रीरामः कं यौवराज्यपदे अभिषिक्तवान्?

(अ) भरतम्। (आ) लक्ष्मणम्। (इ) भरतं लक्ष्मणं चापि।

V. सीतया यदा मणिहारः दत्तः तदा हनूमान् किं कृतवान्?

(अ) सर्वान् मणीन् दष्ट्वा तेषु रामः अस्ति वा इति परीक्षितवान्।

(आ) सन्तोषेण कण्ठे धृतवान्, तावदेव।

(इ) उपायनं न इच्छामि इति वदन् हारस्वीकारं निराकृतवान्।

उत्तराणि—

I. – (अ). II. – (आ). III. – (अ). IV. – (अ). V. – (आ).

रसप्रश्नाः—

रावणवधः

(युद्धारम्भानन्तरं बहूनि दिनानि अतीतानि। रावणपक्षीयाः वीराधिवीराः अपि राक्षसाः मरणं प्राप्तवन्तः। इन्द्रजित्-कुम्भकर्णादयः अति वीरस्वर्गं गतवन्तः। अन्ते रावणः एव रणरङ्गम् आगतवान्। वानरान् बहून् मारयन् लक्ष्मणं मूर्च्छितं कृतवान् अपि। ततः राम-रावणयोः घोरं युद्धम् आरब्धम्। एतद्युद्धानन्तरघटनाः आधारीकृत्य वाल्मीकिरामयणकथानुसारम् अधः केचन प्रश्नाः सज्जीकृताः सन्ति। युक्तम् उत्तरं जानन्तु।)

I. रावणं जेतुम् उपायं चिन्तयन्तं श्रीरामं कः आदित्यहृदयं बोधितवान्?
   (अ) विभीषणः। (आ) अगस्त्यः। (इ) विश्वामित्रः।

II. 'भूमौ स्थितस्य रामस्य, रथस्थस्य रावणस्य च युद्ध न समम्' इति आलोच्य कः रामनिमित्तं सारथिसहितं रथं प्रेषितवान्?
   (अ) सूर्यः। (आ) कुबेरः। (इ) देवेन्द्रः।

III. तस्य रथस्य सारथेः नाम किम्?
   (अ) अरुणः। (आ) मातलिः। (इ) नलकूबरः।

IV. गगनं गगनाकारं सागरः सागरोपमः।
   रामरावणयोर्युद्धं रामरावणयोरिव।। — इत्येषः प्रसिद्धः श्लोकः कैः उक्तः?
   (अ) युद्धं पश्यद्भिः वानरैः।
   (आ) युद्धं पश्यद्भिः राक्षसैः।
   (इ) युद्धं पश्यद्भिः ऋषिदेवगन्धर्वादिभिः।

V. रामेण रावणस्य शिरांसि कतिवारं कर्तितानि?
   (अ) दरावारम्। (आ) शतवारम्। (इ) सहस्रवारम्।

VI. रामः रावणं केन अस्त्रेण संहृतवान्?
   (अ) आग्नेयास्त्रेण। (आ) ऐन्द्रास्त्रेण। (इ) ब्रह्मास्त्रेण।

उत्तराणि—

I. – (आ). II. – (इ). III. – (आ). IV. – (इ). V. – (आ). VI. – (इ).